शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
कर्मविपाक	[illegible]	वेदांग	पूर्ण	-	3/12	133	संस्कृत	कागद	11	57	संवत 1838	

M-2970

अथकर्मविपाकप्रारम्भते

श्रीगणेशायनमः॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ अथप्रश्नवि
धिः॥ रविवारेचसंक्रान्तौशुभेयोगेतथाविधिः वैधृतौचव्यतीपातेविप्राणांचगृहेतथा २ देवतायतनेचैवन
द्यांवैसंगमोत्तमे अथवास्वगृहेचैवशुभेस्थानेविशेषतः ३ स्नानंसमाचरेद्रोगीमृतपुत्रःसपुत्रकः कर्मणापी
डितोयोसौनारीवापुरुषोथवा ४ धात्रीफलानिलोध्रंचगोमयंतिलसर्षपम् मृत्तिकाःसप्तकर्पूरमुशीरंमुस्तसं
युतम् ५ औषधैस्समभागैस्तुस्नानंकुर्यात्प्रयत्नतः देवान्पितॄंश्चसंतर्प्यदत्वासूर्यार्घमेवच ६ एवंसर्वविधिंकृत्वा
संकल्पंकारयेत्ततः अद्येहेत्यादिप्राचीनसंचितकर्म्मविलोकनार्थम् मनःकामनासिध्यर्थंविष्णोःपूजनपूर्वकं
कर्म्मविपाकपुस्तकपूजनमहंकरिष्ये अंगन्यासपूर्वकषोडशोपचारपूजासंकल्पवैश्वदेवश्राद्धंच अत्रांतरे
दिहस्यशुध्यर्थंपुरश्चरणंगत्वेनगोमिथुनदानहृतंकुंभदानंचप्रजापतिसंतुष्ट्येषोडशब्राह्मणान्भोजयेत् भोज
नांतरेप्रार्थनाचार्य्यस्य॥ ब्राह्मणात्वंमहाभागभूमिदेवद्विजोत्तम। यथाविधंप्रतिज्ञायप्राचीनंचशुभाशुभम्॥
७ कथमेकथयस्वाशुकृपांकृत्वाममोपरि एवंतुब्राह्मणाचार्य्यंनमस्कृत्यप्रसादयेत् ८ दशपञ्चतथाविप्रांनु
पवेश्यप्रयत्नतः तेषामनुज्ञयासर्वंप्रायश्चित्तमुपक्रमेत् ९ वस्त्रालंकरणैराचार्य्यंपूजयित्वाप्रजापतिस्वरूपंगुरुं

प्रार्थयेत् प्रजापते महावाहो वेदवेदांगपारगं॥ पुत्रकामसमृद्ध्यर्थं पूजां गृह्णा थनेन नमः १० विष्णो त्वं पुण्डरीकाक्ष भु
वनानां च पालक लक्ष्म्या सह हृषीकेश पूजां गृह्णीष्व तेन नमः ११ रुद्र विदैन्यनाशाय सदा भस्मांगधारक नागहारो
पवीती च पूजां गृह्णीष्व तेन नमः १२ सर्वे सुराश्च गंधर्वाः पाताले पन्नगादयः मृत्युलोके मानवाश्च सर्वे ध्यायन्ति भा
स्करम् १३ सहायं ज्ञानदिं होमो अग्निहोत्रादिकर्म च तीर्थस्नानं तथा ध्यानं वर्त्तते भास्करोदयात् १४ ब्रह्मा वि
ष्णुः शिवः शक्तिर्देवदेवो मुनीश्वराः ध्यायन्ति भास्करं देवं साक्षीभूतं जगत्त्रये १५ त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं
प्रजापतिः त्वमग्निस्त्वं वषट्कारस्त्वामाहुः सर्वसाक्षिणम् १६ योगिनां प्रथमो ध्येयो यतीनां ब्रह्मचारिणाम् आधि
व्याधेश्च कर्त्ता त्वं सर्वपापक्षयं कुरु १७ दीनानां कृपणानां च सर्वेषां व्याधिनाशनः एवं च भास्करं ध्यात्वा नमस्कृत्य
प्रसादयेत् १८ अथ पृच्छकनियमः पापी चैव दुराचारी परनिंदापरो जनः ब्रह्महा हेमहारी च सुरापी गुरुतल्पकः
१९ स्त्रीहन्ता वालघाती च अगम्यागमनं तथा एवमादिकपापानि मया वै पूर्वजन्मनि २० कृतानि विविधान्येव सर्वा
णि मा उद्धर्तुमर्हसि शरणं नव संप्राप्तस्त्वं मामुद्धर्तुमर्हसि २१ ममोपरि कृपां कृत्वा कर्म मे कथय प्रभो लग्नं तात्कालिकं
कृत्वा जन्मपत्रं निरीक्ष्य च २२ लग्नग्रहविचारेण ज्ञातव्यं कर्म मानुषम् ग्रहलग्नविचारेण ज्ञातव्यं शास्त्रपारगैः २३॥

सूतउवाच कैलासेशिखरेरम्येसुखासीनंमहेश्वरम् प्रणम्यपार्वतीभक्त्यापप्रच्छुचसदाशिवम् २४ पार्वत्युवाच
देवदेवजगन्नाथभक्तानुग्रहकारक लोकोपकारकंप्रश्नंवदमेपरमेश्वर २५ केलोचमानवास्तुच्छ्राःपापमो
हसमन्विताः महारोगग्रहग्रस्ताःपुत्रकन्याविवर्जिताः २६ कुत्सितारूपविभ्रष्टामृतवत्सानपुंसकाः नारीणांपु
रुषाणांचपूर्वकर्मचयत्प्रभो २७ तत्सर्ववदमेस्वामिन्सर्वज्ञोसिमतोमम तत्त्वश्रुत्वावचोदेव्याःप्रीतिमान्समहे
श्वरः २८ प्रहस्यजगतामीशोवल्लभांप्रीतिसंयुताम् उवाचप्रश्नंतद्गूढंत्रैलोकेचापिदुर्लभम् २९ शिवउवाच शृ
णुत्वंगिरिजेदेविनृणांकर्मविशेषतः कथयामिनसंदेहोयत्तेमनसिवर्त्तते ३० मर्त्याःसर्वेजगज्जाताःस्वरावरमि
दंहिवै स्वकर्मणांततोदेविभुंज्यतेदेवमानुषैः ३१ मानवेस्तुविशेषेणसुखदुःखादिकंचयेत् कर्मत्रयंचसर्वेषां
तन्मध्येसंचितंचयत् ३२ वक्तव्यंनात्रसंदेहोयत्कृत्वाफलमाप्नुयात् प्रारब्धंविस्तरंकर्मवर्त्तमानंचदृश्यते ३३ अश्वि
न्यादिनक्षत्रेणसर्वेषांजन्मजायते तदादिपादभेदेनज्ञातव्यंचशुभाशुभम् ३४ इतिश्रीकूर्मविपाकसंहितायांपूजन
विधिर्नामप्रथमोध्यायः १ अश्विन्याःप्रथमेपादेयदाजन्मप्रजायते यदाब्रह्मणवर्णोयंमध्यदेशसमुद्भवः १ द्वितीयचरणेदे
विप्रास्त्रीनचान्यथा अयोध्यापुरतःसर्वपुत्रकन्याविवर्जिताः २ तृतीयचरणेदेविवैश्यवर्णसमुद्भवः रोगीकुत्सितव

दाम्भूद्वंविजानीयाद्रोगवान्मृतवत्सकः ४ श्यामलंपुष्टदेहश्चवातरोगेणपीडितः॥ इतिश्रीअश्विनीनक्षत्रस्यसामान्य
फलम् शिवउवाच अथकर्मप्रवक्ष्यामिपत्कृतंब्राह्मणादिभिः एकोब्राह्मणवेदज्ञोगुणरूपसमन्वितः १ तस्यप
त्नीविशालाक्षीपुंश्चलीक्षत्रवंशजा तस्यांपुत्रोभवद्देविनाम्नानरहरिस्तदा २ ब्रह्मकर्मपरिभ्रष्टोव्याधिभिःपीडितः
सदा तस्यमित्रंद्विजोप्येकोधनपुत्रैश्चसंयुतः ३ नाम्नतोलग्नशर्म्मेतिनिकतेतस्यचागतः आदरंबहुधाकृ
त्वास्वर्णेदृष्ट्याप्रहर्षितः ४ स्वर्णलोभेनतंविप्रंहतवान्पुत्रसंयुतम् स्वर्णसर्वंहृतंदेविव्ययंकृत्वादिनेदिने ५॥
षोडशैर्गुपदानंवैगङ्गायमुनसंगमे चकारतद्धनैर्भक्त्याविष्णुप्रीतिकरंतदा ६ एवंबहुगतेकालेपत्नीतस्य
मृतापुरा पश्चात्सोपिग्रहग्रस्तोमृत्युमाप्नोतिदुर्जनः ७ निक्षिप्तोनरकेघोरेयमदूतैर्यमाज्ञया युगसप्ततिपर्यन्तं
भुक्त्वानरकयातनाम् ८ नरकान्निःसृतोदेवीसृगालोगहनेवने ततस्योनिजफलंभुक्त्वाकृमियोनिर्भवेत्पुनः॥
९॥ पुनर्मानुषयोनिःसतूर्णेचप्रथितेपदे मध्यदेशेशुभेग्रामेमृतवत्सोह्यपुत्रकः १० रुग्णोबहुधनाढ्यश्चगौडो
मांसप्रियःसदा तस्यभार्यामहालुब्धापुरालोकमतीचया ११ पुनर्विवाहितादेवीपूर्वजन्मप्रसंगतः मासिपुष्पंभवे
त्तस्याःसंतानोनैवाभवेत् १२ स्वज्वरादीर्घनेत्रासाकुक्षिपीडाप्रपीडिता इतिश्रुत्वावचस्तस्यमहादेवप्रियाशि

वा १३ प्रणम्यपार्वतींदेवींशङ्करंपरमेश्वरम् उवाचवचनंदेवंचराचरगुरुंपरम् १४ प्राणिनांकेवलंकर्मतत्वमाया
विचेष्टितम् शुभमेवाशुभंचैवकथंजानामिपूर्वजम् १५ तत्सर्वंकृपयादेववदमेपरमेश्वर ईश्वरउवाच त्रिवि
धंप्राणिनांकर्मनृणांचैवस्वभावजम् अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलम् १६ अनिष्टंनागलोकेचनर
केविविधेयवा इष्टंस्वर्गफलंदेविमिश्रंमर्त्येप्रजायते १७ रोगतश्चेष्टयासर्वंज्ञेयंसर्वंशुभाशुभम् राजरोगीभवे
द्यस्तुब्रह्महापूर्वजन्मनि १८ पुत्रकन्याविहीनोयोगोत्रहागुरुहाभवेत् पांडुरोगीनुरोयस्तुदेवपूजनवर्जितः १९ क
न्यापत्यंभवेतस्यवेदनिंदाकृतापुरा कन्याघातीपक्षिघातीतस्यभार्यानजीवति २० भ्रातृहायपुरादेविसज्वरेणप्रपी
डितः घंटावादित्रहारीचकररोगीनरोभवेत् २१ भगिनीभावनंदेवीकृतंयैःपूर्वजन्मनि तेनपापेनभोदेविसज्वरेणप्र
पीडितः २२ मित्रद्रोहीबालघातीपशुघातीतथैवच तत्फलेनमहादेविमृतवत्सश्चरोगवान् २३ कायाघातीगर्भपाती
धनपुस्तकहारकः जन्मान्धोजायतेदेविनात्रकार्याविचारणा २४ वस्त्रहाभूमिहारीचपरनिंदापहारकः तेनपापेनभो
देविदरिद्रोजायतेनरः २५ गोत्रहारापहारीचदीर्घरोगीभवेन्नरः महिषीपुत्रघातीकंपरोगीप्रजायते २६ निर्बीजंवृषभंये
चप्रकुर्वंतिनराधमाः पराङ्मुसंजायतेदेविमूत्रकृच्छ्रीभवेत्ततः २७ मातृहापितृहादेविमहाकुष्टीनरोभवेत् अगम्या

गमनंयस्तुवीरयोषागमंतथा २८ करोतियोधमंस्तस्यशरीरंज्वरपीडितं गोवधीजायतेदेवीश्वेतकुष्टीनरःसदा २९
कन्यकागमनंयस्तुकरोतिहठतःपुरा तेनपापेनभोदेविरोगवान्धनवर्जितः ३० पुष्पगंधापहारीचमुखेतस्यप्र
गंधता घृतहारीभवेत्कुष्ठीतस्माद्दुष्टःकृमिर्भवेत् ३१ वृक्षगन्धापहारीचकाकःसंजायतेनरः वापीकूपापहा
रीचदद्रुरोगीभवेन्नरः ३२ देवपात्रापहारीचकण्ठरोगीभवेन्नरः सारङ्गीतघातीचवनेदावाग्निदाहकः ३३ अ
क्षिरोगीनासिकायांव्रणीकृमिसमाकुलः तैलहारीभवेत्तैलीगुडहारीज्वरीसदा ३४ स्वर्णरौप्यपहारीचनरोभव
तिपुत्रहा दासदासीहरोयस्तुनरोभवतिकर्णकुक् ३५ लोहमौल्यापहारीयःपाण्डुरोगीभवेन्नरः दधिदुग्धह
रोयस्तुकुक्षिरोगीभवेन्नरः ३६ मार्गग्राहीवस्त्रग्राहीवाहुरोगीप्रजायते मयूरकुकुटानांचकच्छपानांचवाधकः॥
३७ वातरोगीचखञ्जश्चजन्मजन्मनपुंसकः मद्यपीमांसभोगीचमत्स्यभोगीतथैवच ३८ तेनपापप्रभावेणचर्म
कारोहिजायते अन्नहाजलहाद्रौचदलरोगीभवेन्नरः ३९ ब्रह्मणस्यगृहंयस्तुधनधान्यसमन्वितम् हरणंतस्यवैकु
र्यान्मृगीरोगीभवेन्नरः ४० एवंवहुविधारोगानराणांचैवजायते पूर्वकर्मफलंचैवभुज्यतेखलुमानवैः ४१ इतिश्रीकर्म
विपाकसंहितायांद्वितीयोध्यायः॥२॥ ईश्वरउवाच शृणुदेविप्रवक्ष्यामियत्नम्वंभुविदुर्लभं प्रायश्चित्तंनराणांचमेष

कर्म॰
४

राशिक्रमादनु १ ब्राह्मणंस्वर्णलोभेन हत्वाचैवसपुत्रकं स्वर्णेनुक्तंसदारेणतत्पायान्मैवजातकः २ प्रायश्चित्तजपंदेविगाय
त्रीत्र्यंवकंततः पंचलक्षप्रमाणेनततः पापाप्रमुच्यते ३ ब्राह्मणस्यसपुत्रस्यप्रतिमांकारयद्बुधः स्वर्णंदशपलस्यैवतांसं
पूज्यप्रयत्नतः कुंडंकृत्वाततोदेविचतुरस्त्रंप्रसन्नधीः प्रतिमांपूजयच्चैवमंत्रेणानेनभोप्रिये ५ ॐनमोगणाधिपतयेगन्ध
पुष्पादिवलिंसमर्पयामिनमः ॐसूर्यायनमः ॐइन्द्रायनमः ॐअग्नयेनमः ॐयमायनमः ॐनैर्ऋतयेनमः ॐकुवेरायन
मः ॐकालायनमः ॐशिवायनमः ॐब्रह्मणेनमः ॐअनंतायनमः ॐगरुडवाहनायनमः ॐविष्वक्सेनमः ॐजयाय
नमः ॐविजयायनमः ॐपुण्यशीलायनमः ॐसुशीलायनमः ॐसर्वेदेवाःसुराःसर्वेब्रह्मविष्णुमहेश्वराः मत्यायंयत्नु
राजातंतत्सर्वंक्षम्यतांसदा ६ इमांपूजांगृहाणेवंममपुत्रंप्रयच्छतु अज्ञानाद्वाप्रमादाद्वायत्कृतंपूर्वजन्मनि ॥ तत्सर्वं
क्षम्यतांदेवप्रयच्छशरणंतव ततोनवग्रहाःसर्वेदिक्पालाश्चाप्युपग्रहाः ८ सर्वेममापराधानिक्षम्यतांपूर्वजन्मनि ए
वंसर्वंयथान्यायंपूजांकृत्वाविचारतः ९ ततोहोमंप्रकुर्वीततिलधान्यादितंदुलैः दशांशंहोमयद्देवीतर्पणंमार्जनंततः
गोदानंचततःकुर्यात्दशवर्णंविशेषतः वृषमेकंप्रदातव्यंस्वर्णशृंगंसहाम्बरं ११ ततोवैब्राह्मणान्देविभोजयेद्विधि
पूर्वकम् भोजनान्तेततोदानंसुवर्णंदक्षिणांततः प्रतिमांलंकृतांदेविवाचकायप्रदापयेत् एवंकृतेमहादेविवंशोभ

४

वतिनान्यथा १२ एकादशीव्रतंचैवसप्तमीरविसंयुता अजन्ममरणादेविकुर्य्यात्सत्ययुतोनरः १४ पूर्वपापविशुद्धिःस्या
त्व्याधिरेवंविनश्यति इतिश्रीकर्मविपाकसंहितायांप्रायश्चित्तकथनंनामतृतीयोध्यायः॥३॥ शिवउवाच॥ अथद्वितीये
वक्ष्यामिप्रायश्चित्तंतथाम्बिके अश्विन्याजायतेदेविपूर्वकर्मविपाकतः १ अयोध्यापुरतोदेविपूर्वक्रोशचतुष्टये सर
यूनिकटेदेविवर्णशंकरक्षत्रियः २ नामतःश्वेतशर्मेतिपुत्रदारसमन्वितः एकदामातुलोदेविपुत्रेणसहसंयुतः ३ आगतो
निकटेदेविस्वर्णकोटिसमन्वितः आदरंवहुधाकृत्वागृहेवासंददौचसः ४ तस्यपत्नीगुणवतीरूपयौवनसंयुता मासमे
कंतदादेविमत्स्यहंभगिनीगृहे ५ भुज्यतेसहपुत्रेणचामिषंविविधंतदा मासान्तेचावधीद्रात्रौमातुलंसहपुत्रकम् भूमिम
ध्येशवंताभ्यांपत्नतःस्थापितंसदा स्वर्णकोटिप्रजग्राहपापात्मागुरुघातकः ७ पत्न्यासहततोद्रव्यव्ययंकुर्याद्दिनेदिने ए
वंवहुतिथेकालेसत्रीकालवशोभवेत् ८ पश्चान्मृताततःपत्नीनिर्जलेगहनेवने कर्दमेनरकेघोरेयमदूतैर्यमाज्ञया ९ नि
क्षिप्यमहतींपीडांतयोर्दत्वाततःप्रिये गुणमेकंवरारोहेभुक्त्वानरकयातनां १० नरकान्निःसृतोदेविगर्दभत्वमजायतः पुनःस
रटयोनिंतुभुक्त्वामर्त्यस्ततोभवेत् ११ वधःकृतःपुरादेविमातुलःपुत्रसंयुतः तस्यापफलतोदेविवंशच्छेदश्चजायते १२ रोग
युक्ताभवेद्देविपत्नीवैपूर्वजन्मभिः ततोविवाहिताजातापुनर्वैपूर्वकर्मतः १३ काशश्वाससमायुक्तोविषमज्वरपीडितः प्रा

पश्चित्तंततस्तस्य प्रवक्ष्यामि दयानिधे १४ प्रत्यहं ब्राह्मणे दानं भक्तिपूर्वं वराननेदशधेनुं प्रयत्नेन हरिवंशः श्रुतिं तथा १५
सुवर्णप्रतिमां कृत्वा पलं पंचदशस्य च वर्तुलाकारकुंडे वै होमं कृत्वा प्रसन्नधीः १६ गायत्रीलक्षजापं च कारयेतु प्रयत्नतः
दशांशं होमः कर्त्तव्यो विप्राणां भोजनं ततः १७ शय्यादानं विशेषेण प्रतिमां पूजयेत्ततः अथ प्रतिमापूजनं षोडशांगुलिका
वेदीमृत्तिकासमसंयुता चतुरस्त्रा विचित्रा च गंधपुष्पसमन्विता १८ तत्र वै प्रतिमां कृत्वा स्थापितां पूजयेत्ततः ॐ चक्रध
रायनमः ॐ गदाधरायनमः ॐ शार्ङ्गिणेनमः ॐ गरुडायनमः ॐ विष्वक्सेनेनमः ॐ शिवायनमः ॐ ब्रह्मणेनमः ॐ प्रजापत
येनमः ॐ सर्वेश्वरायनमः ॐ लक्ष्म्यैनमः ॥ ॐ देवदेव महादेव शंखचक्रगदाधर मम पूर्वकृतं पापं हरत्वं धरणीधर १९
एवं पूजां समाप्यैवं प्रतिमां तां च दापयेत् आचार्याय तदा देवि सुवर्णो दक्षिणां ततः २० ततः प्रदक्षिणां कृत्वा ब्रह्मणे व्यासरू
पिणे माघे मासि प्रयागे तु स्नानं पत्नीसमन्वितः १० एवं कृते न संदेहो वंशो भवति नान्यथा मृतवत्सा लभेत्पुत्रं वंध्यत्वं च वि
शेषतः २२ रोगी चेन्मुच्यते रोगात्कन्यका नैव जायते इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे द्वितीयचरणविचार
णं नाम चतुर्थोध्यायः ४ ईश्वर उवाच अथातः संप्रवक्ष्यामि नक्षत्रतुरगस्य तु तृतीयस्य ततो देवि प्रायश्चित्तमतः शृणु
१ अयोध्यापुरतो देवि दक्षिणे पूर्वदिक्तटे नारायणपुरे शुभ्रे राजपुत्रो भवत्तदा स्वकर्मनिरतो दान्तो प्रजापोषणतत्परः नाम

तम्बोलहिंसेतितस्यपत्नीप्रभावती ३ तस्यमित्रोद्विजोप्येकस्वकर्मपरिवर्जितः एकदामृगयांयातोराजपुत्रः सब्राह्मणः
४मृगंहत्वावरारोहेजगामगहनेवने मांसस्यदेविभागार्थेकलहोहिमहानभूत् ५ततस्सब्राह्मणोदुष्टः क्रोधेनैवापि
चद्विषन् मरणंतस्यभोदेविवभूवगहनेवने ६ततश्चिंतापरीतात्माराजपुत्रोगृहंययौ गृहेचकारयामासतस्यक
र्म्मयथाविधि ७ ततोवहुगतेकालेप्रयागेमकरेमुदा शरीरंत्यक्तवान्देविभार्यायासहितस्तदा ८ स्वर्गंभुक्त्वायुगान्
ससनतः पुण्यक्षयेसति मर्त्यलोकेभवज्जन्मधनधान्यसमन्वितः ९ भार्य्ययासहितोदेविमध्यदेशेवरानने॥
पुत्रोनजायतेदेविपूर्वकर्मविपाकतः १० ब्रह्महत्याफलेनैवमृतवत्सोपिवाभनेत् तस्यशुद्धिंप्रवक्ष्यामियतःपुत्रःप्र
जायते ११ तदुद्देशेनकर्त्तव्यस्तडागोवापिकापथि हरिवंशश्रवणंदेविविधिपूर्वमतःशिवे दशवर्णप्रदातव्यास्व
र्णयुक्तासहाम्बरा एवंकृतेनसंदेहोवंशस्तस्यप्रजायते १३ सास्त्रीस्यात्सुखिनीदेविसत्यमेवनसंशयः काकवं
ध्यात्वमुक्तास्यान्मृतवत्सासुखावहा १४ व्याधिनाशोभवेद्देविनात्रकार्याविचारणा॥ इतिश्रीकर्मविपाकसंहि
तायांपार्वतीहरसंवादेअश्विनीतृतीयचरणविचारणंनामपंचमोध्यायः॥५॥ ईश्वरउवाच शृणुदेविवरारो
हेनृणांकर्मविपाकजं तदहंसंप्रवक्ष्यामियथाकर्मानुसारतः १पुत्रावहुविधादेविलौकिकावैविचक्षणाःजायं

कर्म॰
६

तेनात्रसंदेहस्तत्सर्वंशृणुवल्लभे २ प्रथमः पुण्यसंबन्धीमातृपितृप्रियः सदा सुतेवानिरतोनित्यंपितुर्मातुश्च
यत्नतः ३ आजन्ममरणादेविपितुराज्ञांकरोतिच मरणेपितृमात्रोश्चश्राद्धंकुर्यादिनेदिने ४ पितृश्राद्धंविनादे
विभोजनंनकरोतिहि द्वितीयः शत्रुसंबंधीतस्यचेष्टांचमेशृणु ५ पूर्वजन्मप्रसंगेनशत्रुपुत्रः प्रजायते जन्म
तःशत्रुरूपेणमातृपित्रोर्विरोधिकृत् ६ तत्कर्मकुरुतेयेनतयोः क्लेशोभिजायते तृतीयऋणसंबंधामत्तःशृणु
वरानने ७ ऋणंयस्यगृहीतंतुनदत्तंहठतःप्रिये तत्रापुत्रत्वमाप्नोतिद्रव्यदातानसंशयः ८ पितृद्रव्यंप्रयत्नेनगृ
ह्णातिहठतःप्रियेद्यूतवेश्याप्रदानेनव्ययंकुर्याद्दिनेदिने ९ यदाद्रव्यविहीनश्चपिताभवतिवैप्रिये तदामृत्युमवा
प्नोतियुवरूपोनसंशयः १० चतुर्थोमित्ररूपेणगृहद्रव्यंचसोस्थितम् स्थापितंद्रव्यमन्यस्यनदत्तंपूर्वजन्मनि
११ तत्संबंधस्वरूपेणपुत्रोजातस्तदाशिवे वहुप्रीतिःपितृभ्यांचपितृव्येगोत्रजेतथा १२ बहुधर्मीगुणीभोक्ता
पितुःशिक्षासुतत्परः यत्करोतिगृहेकर्मसुखदंजायतेततः १३ पूर्वरूपोयदादेविपत्नीपुत्रसमन्वितः ततःश
रीरंवैत्यक्त्वाधनंगृह्यततःप्रिये १४ अथवक्ष्यामितेदेविचतुर्थचरणंशिवे नक्षत्रतुरगस्यैवप्राणिनांनियतःशृ
णु १५ कोशलापुरतोदेविशरय्वाउत्तरेतटे तत्रक्षत्रीवसत्येकोनगरेनंदनेतदा १६ तत्रधर्मविहीनस्तुलक्ष्मणे

६

तिश्चनामतः तस्यभार्याविशालाक्षीकल्याणीनामसाप्रिये १७ कुलटायौवनोमत्तापरपुंसिरतासदा व्यापारंकारया
मासवस्त्रहेमादिकस्यहि १८ उद्यमंबहुधाकृत्वाद्विजैःसहवरानने एवंबहुतिथेकालेविप्रद्रव्यंतुचोरयेत् १९॥
तेनशोकेनविप्रस्तुशीघ्रपंचत्वमागतः ततोबहुतिथेकालेराजपुत्रस्यपञ्चता २० गतःसनरकंघोरेनिरुच्छ्वासं
सुदारुणम् षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् २१ नरकान्निसृतोदेविविषयोनिःपुराभवत् ततोवैराजपुत्र
स्तुमानुषत्वमुपागतः २२ पुरातुयत्कृतंपापंयदिहैवप्रभुज्यते मित्रस्यवंचनाद्देविपुत्रस्यैवचपञ्चता २३ काक
वन्ध्याभवेत्पत्नीदुःखशोकसमन्विता तस्यपुण्यंप्रवक्ष्यामिपूर्वपापस्यनिग्रहं २४ गायत्रीलक्षजाप्येनसर्वपापं
प्रणश्यति कूष्मांडंनारिकेरंचस्वर्णयुक्तंसहान्वरम् २५ गंगामध्येप्रदातव्यंसंतानार्थंवरानने वर्तुलाकारकुंडेतु
होमंचैवतुकारयेत २६ स्वर्णशृंगीरौप्यखुरांपट्टवस्त्रसमन्विताम् आचार्यायप्रदद्यात्तुसपात्रांविधिवत्प्रिये २७
एवंकृतेनसंदेहोवन्ध्यात्वंचप्रणश्यति पुत्रपौत्राश्ववर्द्धंतेनसंदेहोवरानने २८ इतिश्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेअश्विनीनक्षत्रस्यचतुर्थचरणप्रायाश्चित्तकथनंनामषष्ठोध्यायः ६ पार्वत्युवाच देवदेवमहादे
वसृष्टिस्थितिलयात्मक स्त्रीणांचकर्मसंब्रूहिदयांकृत्वाममोपरि १ ईश्वरउवाच नारीणांशृणुमेसर्वंयत्कृतंपूर्वं

कर्मेनि तत्ते ऽहं संप्रवक्ष्यामि समासेन वरानने २ पूर्वजन्मनि या नारी पतिनिन्दां चकार ह तेन पापेन भो देवि न स्त्री पु
ष्पवती भवेत् ४ तदा रौप्यस्यैव वृक्षं स्वाङ्गुष्ठपरिमाणकम् पलपञ्चमितं देवि दद्याद्वै देवि देवि प्रिये ४ तदा पुष्पं भवे
द्देवि नात्र कार्या विचारणा पतिं सुमं परित्यज्य परे पुंसि रता भवेत् ५ तेन पापेन भो देवि वन्ध्या नारी प्रजायते सु
वर्णस्य कृतं वृक्षं फलपुष्पसमन्वितं ६ दद्याद्वै देवि देवि नारी पतिसेवासु तत्परा ततः पुत्रं प्रसूयेन सुवर्णपलतो दश
पर पुंसि रता नारी स्वपतिं मिष्टवादिनी तेन पापेन भो देवि कन्यापत्यं च जायते ८ रौप्यस्यैव कृतं लिंगं पलपञ्चद
शेन तु पूजयित्वा प्रयत्नेन दद्याद्धि प्राय श्रोत्रिणे ९ तत कन्या हि न भवेच्छुभं पुत्रं प्रसूयते सततं वै यदा नारी कु
लटा धर्मचारिणी १० तेन कर्मविपाकेन नारी गर्भं विनश्यति ततः प्रपूजयद्देवं शंखचक्रगदाधरं ११ प्रयागे म
करे स्नानं पतिना तु सहाचरेत् स्वर्णशृङ्गं रौप्यखुरं मुक्तालांगूलग्रंथितम् १२ दद्यात्सदक्षिणं देवि वृषभं विदुषे त
था या पतिं दुर्बलं त्यक्त्वा परेण सह संगता १३ तेन पापेन भो देवि दरिद्रा पुत्रवर्जिता ततः कुमारीं संपूज्य ब्रह्मविष्णु
महेश्वरम् १४ पूजयेद्वृद्धमेकं तु प्रत्येहं निपतः प्रिये वर्षे पूर्णे ततस्तस्यैव वस्त्रं दत्वा विसर्जयेत् ॥ व्रतं सूर्यस्य वै कु
र्यात्प्रणम्य प्रतिवासरं तदा नारी पूर्वपापं दहत्येव न संशयः १८ मिष्टं भुनक्ति या नारी पत्ये मिष्टं ददाति न तेन पा

पेनसानारीमुखेदौर्गन्ध्यगामिनी १७ गुडंवामधुवाखण्डं विप्रायप्रयतः सदा प्रयच्छतियदादेवि मुखेशुद्धिश्च
जायते १८ स्वपतिघ्नीचयानारीरण्डाभवतिनान्यथा तथानित्यंप्रपूज्याचतुलसीभक्तिभावतः १९ ऊर्ज्जेमा
घेचवैशाखेप्रातः स्नानंसमाचरेत् एकादशीव्रतंनित्यंद्वादशाक्षरविद्यया २० जपंकृत्वाप्रयत्नेनपतिरूपायवि
प्रावे समर्प्पणंततः कुर्य्यात्ततः पापंप्रणश्यति २२ यदापापयुतानारीगर्भपातंचकारयेत् तेनदुश्चरितेनेह
ज्वरंकुक्षींप्रपीडनं २३ योनिशूलंभवेद्देविगुदरोगोभगन्दरः तदाकुर्य्यात्प्रयत्नेनब्राह्मणीब्राह्मणंतथा २३ रौ
प्यस्यचमहादेविदर्शनिष्कस्यभक्तितः प्रत्येहं पूजयेद्देविपत्युराज्ञांसमाचरेत् २४ भोजयेद्द्विविधैश्चान्नैर्घृ
तखंडसमन्वितैः गोदानंचततः कुर्य्याद्भक्त्याविद्योपजीविने २५ यदानारीचदुष्टात्मास्वपतौदुर्वचोवदेत् त
दाकण्ठेभवेद्रोगो नासिकापाचपीनसम् २६ तिलगुल्मंवापिशिवेश्वेतपुष्पंप्रजायते रौप्यंपुष्पयुतंदेविसुवर्णेन
समन्वितम् २७ दद्याद्विप्रायविदुषेतदासपत्नंशुभे कन्यकांकलहाद्दुष्टाहन्तिनारीयदाहठात् २८ तदाकुष्टंभ
वेद्देविजन्मजन्मदरिद्रता सूर्यस्यपूजनंकांतेसदानारीव्रतंचरेत् २९ मासेमासेशनौवारेवृक्षेविष्णुस्वरूपिणि॥
विधिवत्पूजनंकुर्यात्सर्वपापविशुध्यति ३० श्वश्रूंचश्वशुरंचैवनित्यंक्रूरवचंवदेत् तेनपापेनभोदेविश्वेतप्र

ष्यंतनौभवेत् ३१ सूर्यस्यप्रतिमांदेविसुवर्णेत्रिपलंस्यच दद्याद्वेदविदेदेविसूर्यस्यैवव्रतंचरेत् ३२ ततःपापंक्षयंयाति
ध्वेनपुण्यंविनश्यति इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेस्त्रीकर्मकथनंनामसप्तमोध्यायः ७ शिवउवाच
भरण्याप्रथमेपादेनीलकण्ठोभवद्द्विजः ब्रह्मकर्मपरिभ्रष्टःकाकुत्स्थनगरेशुभे १ वैश्यनसहमित्रत्वंक्रयंकृत्वादिने
दिने ब्राह्मणीतत्रचद्वासीन्पतिपुत्रविवर्जिता २ तस्याद्रव्यंगृहीतंचविक्रयार्थंद्विजेनतु ततोवहुदिनंयातंतस्याद्रव्यं
नरक्तवान् ३ एवंवहुतिथेकालेतस्यमृत्युरजायेत ब्रह्मकर्मपरीभ्रष्टान्नरकेपतनंप्रिये ४ नरकान्निःसृतोदेविसर्प
योनिरजायत सर्पयोनिभलंभुक्त्वागर्दभत्वमुपागतः ५ पुनःसप्रासवान्देविमध्यदेशेचमानुषम् धनधान्यसमायु॥
क्तःपुत्रकन्याविवर्जितः ६ ततोवहुतिथेकालेतदाकन्याभवत्प्रिये स्वर्णपूर्णहृतंदेविस्वर्णसंवंधजासुता ७ ततःसा
वर्द्धिताकन्याविवाहश्चाभवत्खलु पितृमातृप्रियानित्यंयुवतीतुयदाभवेत् ८ तदासाविधवाजातामातापिश्चदुःख
दा पुनःपुत्रविहीनत्वंप्रायश्चित्तमतःशृणु ९ सूर्यमंत्रस्यजापेनलक्षमेकंवरानने पार्थिवस्यार्चनंसम्यक्त्र्यंवकेति
ततोजपेत् १० होमंचकारयेद्धोमान् शतब्राह्मणभोजनम् पायसंशर्करायुक्तंकारयेद्विधिपूर्वकम् ११ ततःकूपतडा
गौचवाटिकांचमहापथे एवंकृतेनसंदेहोवंशलाभोवरानने १२ यदानक्रियतेदेवितदावंशोनजायते इतिश्रीकर्मवि

पाकसंहितायांपार्वतीहरसंवादे भरणीनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामाष्टमोध्यायः ८ ईश्वरउवाच अ
थद्वितीयेवक्ष्यामि भरण्याश्चरणेप्रिये तस्यसर्वप्रवक्ष्यामियत्कृतंपूर्वजन्मनि १ अयोध्यापुरतोदेवि क्रोशमात्रेप्रद
क्षिणे जानकीनगरेशुभ्रे द्विजश्चासीत्सतस्करः २ ब्रह्मकर्मपरिभ्रष्टोमद्यपानरतः सदा सवेश्यानिरतोनित्यंपत्नी
तस्यपतिव्रता ३ पतिभक्तिरतानित्यंदेवपूजासुतत्परा एकदाब्राह्मणेप्येकः क्षुधार्त्तोदुर्बलःप्रिये ४ अन्नंचयांपापामा
सलपटंप्रतिवत्सले दुर्वचश्चावदद्देविभिक्षुकंप्रतिदुर्बलं ५ आत्मघातःकृतस्तेनदुर्बलब्राह्मणेनच ततोवहुतिथे
कालेमरणंतस्यचाभवत् ६ पातिव्रतेनतत्पत्न्याःसत्यलोकंजगामसः वहुवर्षसहस्राणिस्वर्गवासोभवत्प्रिये ७ त
तः पुण्यक्षयेजातेमर्त्यलोकेसमानुषः पूर्वपापफलाद्देविपुत्रकन्याविवर्जितः ८ तदुद्देशेनमरणंब्राह्मणस्याभवत्पु
रा मद्यपानंकृतंतेनततःकुष्ठीप्रजायते ९ तस्यशांतिंप्रवक्ष्यामियतःपापात्प्रमुच्यते गायत्रीमूलमंत्रेणलक्षजाप्यंप्र
यत्नतः १० दशांशहोमःकर्त्तव्योविप्राणांभोजनंशतम् विधिवत्पूजयद्देविकपिलांस्वर्णभूषिताम् ११ दद्याद्विप्रायतांदेवि
विदुषेज्ञानरूपिणे अतःपुत्रःप्रजायेतरोगनाशोभवेद्ध्रुवम् १२ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादे भरणीनक्ष
त्रद्वितीयचरणप्रायश्चित्तकथनंनामनवमोध्यायः ९ शिवउवाच एकोवणिग्जनोदेविकाकुत्स्थनगरेशुभे अग्निको

कर्म.
९

ऐो शिवपुरे योजनार्द्धप्रमाणके १ धनाढ्यो ह्यवसद्देवि वैश्य प्रवृत्तिरतः सदा विक्रयं कुरुते देवि गुडमन्नं रसादिकम् २ ए
कस्मिन्समये देवि गुडमादाय गच्छतः वृषभं भारसंपन्नं करोति स्म वरानने ३ भारेण पीडितो नड्वान्मृतः पथि गतः शि
वे नड्वा तं तस्य वै पापं वृषभार्त्तिसमुद्भवम् ४ एवं वहुतिथे काले विल्वमंगलके पुरे वैश्यस्य मरणं जातं सख्यां सह भार्य
या ५ स्वर्गलोके गतौ द्वौ च तौ तु क्षेत्रप्रभावतः षष्टिवर्षसहस्राणि स्वर्णभुक्तं शुभं फलम् ६ ततः पुण्यक्षये जाते मर्त्यलो
के वरानने अवंतीनगरे जातौ धनधान्यसमन्वितौ ७ मध्यदेशे विशालाक्षि पूर्वकर्मफलेन हि पुत्रो न जायते देवि ग
र्भपातस्तथा शिवे ८ कन्यका वै प्रजायेत पुनः पुनर्वरानने शरीरे च ज्वरोत्पत्तिर्मध्ये मध्ये प्रजायते ९ प्रायश्चित्तं प्रव
क्ष्यामि पूर्वपापविशुद्धये सुवर्णस्य वृषं शुभ्रं पलपंचमितं तथा १० प्रतिमां कारयेद्देवि वृषमेकं विभूषितम् प्रपूज्य शि
वमन्त्रेण वैदिकेन यथाविधि ११ प्रदद्याद्विदुषे तस्मै ज्ञानिने शुद्धबुद्धये नमः शिवाय मन्त्रे लक्षजाप्यं प्रयत्नतः १२ रोग
तो मुच्यते देवि नात्र कार्या विचारणा इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे भरण्यास्तृतीयचरणप्रायश्चि
त्तकथनं नाम दशमोध्यायः १० शिव उवाच शृणु देवि वरारोहे नृणां कर्मविपाकजम् प्रवक्ष्यामि न संदेहो यदि ते श्रव
णो मतिः १ उत्तरे चाप्ययोध्यायाततः क्रोशत्रयोपरि तत्र तस्थौ च भो देवि लोकशर्मेति नामतः २ तस्य पत्नी शुभाङ्गी वै

९

स्त्रीलानाम्नीतिविख्याता ब्राह्मणः कर्मविभ्रष्टोव्याधरूपोवरानने ३ मृगान्सबालकान्हत्वापक्षिणोविविधानपि बुभो
जपत्नीयुक्तस्तुतोषवहुधातदा ४ तस्यपत्नीमहादुष्टामुखराचंचलातथा परपुंसिरतानित्यंधर्मकर्मविवर्जिता ५ एवं
सर्ववयोजातंगृहेसतिवरानने मरणंतस्यवैदेविस्वपुरेसर्प्पतस्तथा ६ पत्नीचैवतदातस्यदुष्टावैव्यभिचारिणी उभौच
नरकेपातौस्वकर्म्मभिर्मतौप्रिये ७ कुंभीपाकेमहाघोरेनानानरकपातनाम् भुक्त्वावहुसहस्राणिपुनर्यातश्चशूकरःयो
नीचशूकरींभुक्त्वाविडालत्वंपुनःप्रिये ततोविडालयोनिंचभुक्त्वागृध्रस्ततोभवेत् ९ पुनःकर्मवशाद्देविमानुषत्वं
ततोलभेत् इहलोकेवरारोहेपूर्वकर्मप्रभावतः १० मृतवत्साभवन्नारीपुत्रश्चैवनजीवति वहुरोगोभवेद्देविज्वरेणैव
प्रपीडितः ११ पूर्वजन्मकृतंपापंइहजन्मनिभुज्यते इहलोकेकृतंकर्मजन्मजन्मनिभुज्यते १२ अथशान्तिंप्रवक्ष्यामि
शृणुत्वंगिरिजेमम वंशगोपालमंत्रेणलक्षजाप्यंवरानने १३ दशांशहोमःकर्त्तव्योविप्राणांभोजनंशतम् मन्त्रंचतत
प्रवक्ष्यामिकृष्णमंत्रमनुत्तमं १४ येनजाप्येनभोदेविशीघ्रंपुत्रमवाप्स्यति ॐदेवकीसुतगोविन्दवासुदेवजगत्पते॥
१५ देहिमेतनयंकृष्णत्वामहंशरणंगतः ततोवैसमृगान्कृत्वामृगवालान्सपक्षिणः स्वर्णेपंचपलेनैवमृगान्कृत्वा
सवालकान् रौप्यस्यैववरारोहेपक्षिणःपंचकारयेत् १७ पूजनंविधिवत्कुर्य्यात्संप्रार्थ्यपरमेश्वरं स्वशक्तिसर्वलो॥

कानांसर्वकर्मप्रदंसताम् १८ देवदेवजगन्नाथशरणागतवत्सल त्राहिमांकृपयादेवपूर्वकर्मविपाकतः १९ एवंसं
पूज्यदेवेशंततोविप्रंप्रपूजयेत् सुवर्णेनवरारोहे सर्प्यादिवाहनेनवै २० प्रतिमामर्पयच्चैवविप्रायज्ञानरूपिणे वा
टिकांकूपरवातंच पश्चिमध्येशुभानने २१ प्रकरोतियदादेवितदापुत्रःप्रजायते रोगात्प्रमुच्यतेदेविजीवेत्सुत्रीन
संशयः २२ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेभरण्याश्चतुर्थचरणेप्रायश्चित्तकथनंनामैकादशो
ध्यायः ११ ईश्वरउवाच कृतिकायांवरारोहेपूर्वजन्मनिसंचितम् नामतोश्रहिशर्मेतिशुभाशुभविचेष्टितम् १ ईशा
नेपिततोदेविकोशलापुरतोघने राजपुत्रोवसत्कश्चिन्नगरेगूहसंज्ञके नामतोश्रहिशर्मेतितस्यपत्नीकलाशु
भा धनधान्यसमायुक्तोरूपवान्ममयोयथा ३ यातिचाखेटकंनित्यंमृगींहत्वाचगर्भिणीं प्रत्यहंमृगमांसेनपोषयेत्
स्वतनुंतथा ४ शरीरेवृद्धजातादयातस्यनचाभवत् ततोवैमरणादेविसतोभार्याततोभवत् ५ सत्यलोकंगतस्तेन
भार्य्यायाःसुकृतेनतु भुक्तंकस्यमितंपुण्यंसत्यलोकेवरानने ६ पुनःपुण्यक्षयेजातेमानुषत्वमुपागतः पत्न्यास
हततोदेविकुलेमहतिपूजिपूजिते ७ पूर्वजन्मविपाकेनमृतवत्सत्वमाप्नुयात् मृगींसगर्भांहतवान्पूर्वजन्मनिसुव्र
ते ८ तेनकर्मविपाकेनमर्त्यलोकेह्यपुत्रकः तस्यशांतिप्रवक्ष्यामियतःपुत्रोपिजायते ९ गायत्रीजातवेदाभ्यास्त।

स्समेकंजपंतथा दशांशहोमः कर्त्तव्योविप्राणांभोजनंततः १० सौवर्णेनमृगींकृत्वामृगवालंतथैव च पूजयित्वाविध
नेनकपिलांचततः प्रिये ११ प्रदद्याद्देवविदुषेब्राह्मणायसुतेजसे हरिवंशस्यश्रवणंचंडिपाठंशिवार्चनम् १२ एवंकृत्वावि
धानेनशीघ्रंपुत्रःप्रजायते कन्यकानभवेत्तस्यगर्भपातोनजायते १३ रोगान्प्रमुच्यतेरोगीसर्वकामःप्रजायते इतिश्रीक
र्मविपाकसंहितायांपार्वतीहरसंवादेकृत्तिकानक्षत्रस्यप्रथमपादप्रायश्चित्तकथनंनामद्वादशोध्यायः १४ शिवउवाच न
राणांपुण्यशीलानामिहजन्मसमुद्भवं सुखंवक्ष्याम्यहंदेविपूर्वकर्मफलंयतः येनदत्तंपुरादानंगोसुवर्णमृगजादिकम् तत्फ
लेनमहादेविइहतस्मात्सुखंभवेत् २ शरीरेजन्मतःकांतिर्लक्ष्मीवान्गुणवानपि सख्यंप्रभुज्यतेनित्यंपुत्रतोधनतस्तथा ३
नरोगोजायतेदेविदुःखंनैवकदाचन इहलोकेसुखंभुक्त्वाकीर्त्तिमानसुखमेधते ४ अथवक्ष्याम्यहंदेविनक्षत्रेकृत्तिकाह्वये
द्वितीयचरणेदेविपूर्वंयत्फलमुच्यते ५ कान्यकुब्जेद्विजःकश्चिदिंद्रशर्मेतिनामतः पत्नीरुद्रमतीदेविकुशीलाकलहप्रिया
६ वेदपाठरतोनित्यंषड्ङ्गस्यचपाठकः एकदातत्रवैदेशेकश्चनक्षत्रीनराधिपः ७ मरणेतस्यवैपातेतद्विप्रस्यनिमंत्रणम् भुक्तं
तेनतदादेविक्षत्रियस्यक्रियासुच ८ गृहीतंतस्यवैदानंशय्याचैवगजादिकम् सर्वंगृह्यगृहंगत्वांभुक्तंबहुदिनंप्रिये ९ ततो
वहुगतेकालेतस्यप्रियस्यपंचता यातावैयमोलोकेवैनरकेवैसुदारुणे १० भुक्तंस्वकर्मजंदुःखंयुगमेकंवरानने गजव्या

ग्रक्रमेयोनिंततोभुंक्तेपृथक्पृथक् ११ मनुष्यत्वंततःप्राप्यपूर्वकर्मविपाकतः पुत्रान्नजायतेदेविकन्यकाविविधास्तदा ॥
१२ मृतवत्साभवेन्नारीरोगाश्चविविधाःप्रिये शांतिंतस्यप्रवक्ष्यामियतः पुत्रमवाप्स्यते १३ गायत्रीलक्षजाप्येत्र्यम्बकेनतथा
प्रिये होमंचकारयामासषडंशोदानमेवच १४ दशवर्णांततोदद्याद्विधिवद्ब्राह्मणायवै भोजयच्छतसंख्याचब्राह्म
णांवेदपारगम् १५ एवंकृतेनभोदेविपुत्रश्चैवप्रजायते रोगाणांचनिवृत्तिःस्यात्पूर्वपापक्षयोभवेत् ॥ १६ इतिश्रीकर्म
विपाकसंहितायांपार्वतीहरसंवादेकृतिकानक्षत्रस्यद्वितीयचरणेप्रायश्चित्तकथनंनामत्रयोदशोध्यायः १३ शिव
उवाच तृतीयंतस्यवैदेविचरणंवदतःशृणु कान्यकुब्जकुलेकश्चिन्नगरेसूर्यसंज्ञके १ उद्योतशर्माविख्यातस्तस्य
स्त्रीगिरिजाभवत् वेदपाठरतोनित्यंदारिद्र्येणैवपीडितः २ कर्कशाभामिनीतस्यनिष्ठुरंवदतीस्मृता एकदासूर्यग्रहणे
तैलकारस्तदागतः ३ गंगामध्येततोदानंतस्मैविप्रायवैशिवे भरदैलस्ससंख्यांचैस्वर्णमुद्रांतुदक्षिणाम् ४ प्रतिगृह्यनतो
दानंगृहंगत्वाद्विजस्तदा व्ययंकरोतिस्मतदाभार्य्यापुत्रेणवैवहि ५ वेदपाठंततस्त्यक्त्वाप्रत्यहंससुखंशिवे मरणंवृद्ध
समयेगृहेशय्योपरिस्थिते ६ स्वर्णमध्येचदानंवैनदत्तंगिरिनन्दिनि सगतोनरकेघोरेयमराजेनप्रेरितः ७ भुंक्तेनरकजं
दुःखंस्त्रीपुत्रेणचसंयुतः ॥ युगमेकंवरारोहेप्रेतत्वंकाकतांततः ८ ततःशृगालयोनिंचमानुषत्वंततोगतः पूर्वजन्मकृ

तं कर्म इह लोके प्रभुज्यते ९ पाठयामास वै वेदान् ब्राह्मणेभ्यो वरानने तत्संचितफलाद्देवि महैश्वर्यमवाप्नुयात् १० भा
र्या मृता ततः पुत्रो द्वितीया च विवाहिता शरीरे बहवो रोगाः सुखं तस्य न जायते ११ वृद्धे सति वरारोहे पुत्रः शत्रुर्भवेदिति मृ
तवत्सा भवेन्नारी पूर्वजन्मविपाकतः १३ तस्य पुण्यमहं वक्ष्ये येतो रोगो निवर्त्तते पुनः पुत्रो भवेद्देवि कन्यका नैव जायते १४
जातवेदादि मंत्रेण जपं वै कारयेद्बुधः लक्षत्रयं प्रयत्नेन ततो होमं तिलादिभिः १४ चतुरस्रे शुभे कुंडे हरिवंशश्रवणं ततः॥
भूदानं विधिवत्कुर्याच्छायापात्रं प्रदापयेत् १५ एवं कृते न संदेहो रोगनाशो भविष्यति पुत्रश्च जायते देवि नात्र कार्या विचार
णा १६ इति श्री कर्मविपाकसंहितायां पार्वतीहरसंवादे कृत्तिकानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम चतुर्दशो
ध्यायः १४ कान्यकुब्जो द्विजः कश्चिन्नर्मदादक्षिणे तटे माहिष्मत्यां वसत्येको द्विजः परमवैष्णवः १ नाम तेजोधशर्मेति
तस्य भार्या तु दानवी प्रत्येहं वैश्यवृत्तिस्तु विक्रयं चाकरोत्तदा २ तत्र वैश्य उवासैको धनधान्यसमन्वितः वैश्यतस्तेन वि
प्रेण स्वर्णं नीतमृणं बहु ३ ततो बहुतिथे काले स विप्रो मृत्युमागतः ऋणं तस्मै न दत्तं वै वैश्याय तु स्वकर्मणे ४ मरणे सति वि
प्रस्तु रौरवं नरकं गतः वैश्यकर्मकृतं तेन स्वकर्म परिमुच्यते ५ विंशद्वर्षसहस्राणि नागलोके वसत्यसौ नरकान्निःसृतो
देवि यातो वृषभमूकरौ ६ योनिद्वयं फलं भुत्का मनुष्यत्वमवाप्तवान् धनधान्यसमायुक्तस्तत्पुण्यस्य प्रभावतः ७ ऋणसं

वंधतो देवि वैश्यपुत्रत्वमागतः प्रत्यहं तस्य वै द्रव्यं व्ययं कुर्याद्दिने दिने ८ मद्यवेश्याप्रदानेन धनं सर्वं व्ययं कृतं यदा पुत्रः
समुत्पन्नो सुवरूपो भवत्प्रिये ९ तदा मृत्युमवाप्नोति शोकं दत्वा तयोस्तदा पुनः पुत्रो न जातो वै पूर्वजन्मविपाकतः १०
प्रायश्चित्तं प्रवक्ष्यामि पूर्वपापविमुक्तये गायत्रीलक्षजाप्येन तदर्थे वाटिकां पथि ११ कूपं प्रयत्नतः कुर्यात्तडागं विधि
पूर्वकं होमं वै कारयेच्चैव विधिपूर्वं वरानने १२ पलपंचसुवर्णस्य दानं दद्याद्विशेषतः दशवर्णाः प्रदातव्यास्स्वर्णयुक्तास्स
हाम्बराः १३ भोजयेच्छतविप्रांस्तु यथाशक्ति सदक्षिणान् एवं कृते न संदेहो रोगनाशो भवेदनु १४ पुत्रपौत्राविवर्द्धंते मम
वाक्यं न चान्यथा इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे कृत्तिकानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं ना
म पंचदशोध्यायः १५ महादेव उवाच अथातः संप्रवक्ष्यामि ब्रह्मतक्षजं भालम् रोहिण्याः प्रथमे पादे यस्य जन्माच जा
यते १ तस्य कर्म पुरा देवि संचितं संब्रवीम्यहम् अन्तर्वेद्यां द्विजः कश्चिद्वीपनामा वसत्प्रिये २ पुण्यकर्मविहीनश्च चोर
कर्मरतः सदा सार्द्धं चौरेण भो देव बहुद्रव्यमुपार्जितम् ३ परस्त्रीलंपटो देवि स्वभार्यां परिमुच्य च एवं बहुगते काले का
लवश्यस्ततो भवेत् ४ यमाज्ञया यदूतैर्नरके नामकर्दमे वासयामास भो देवि षष्टिवर्षसहस्रकम् ५ नरकान्निःसृतो
देवि कुक्कुरत्वं प्रजायते ततो यातो महादेवि नरयोनिं च दुर्लभाम् ६ पांडुरोगेन संयुक्तः पुत्रो नैव प्रजायते वेश्याः कन्याः

प्रजायंते पुत्रस्य मरणं भवेत् ७ तस्योपदानं वक्ष्यामि तत्सर्वं शृणु मे प्रिये ॐ नमः शिवाय मंत्रेण लक्षजाप्यं च कारयेत् ८
पार्थिवं तिलपृष्टेन गोमयेन तथा प्रिये पूजयामास विधिवद्भक्तियुक्तेन चेतसा ९ होमं वै कारयेद्देवि षडंशं दशिणां त
तः श्रायीयसुवर्णं च पूर्वपापविशुद्धये १० कूपं रवादं ततो देवि वाटिकां चैव कारयेत् एवं कृते न संदेहो रोगनाशो भवे
त्तु ११ कन्यका न भवेद्देवि पुत्रश्चैव प्रजायते मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् १२ इति श्रीकर्मविपाकसं
हितायां पार्वतीहरसंवादे रोहिणीनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नाम षोडशोध्यायः १६ शिव उवाच हि
तीयचरणं देवि रोहिण्याः शृणु विस्तरं गंगाया उत्तरे कूले पुरं वैमानिकं शुभम् १ वासुदेवश्च नाम्ना हि ब्राह्मणो वेद
पारगः लीलावती पवित्रा च तस्य पत्नी शुभा तथा २ युवती रूपसंपन्ना स्वैरिणी च सदा प्रिये बहुद्रव्यं तया लब्धं परपुंस
प्रसंगतः ३ पापार्जितं द्रव्यं भुज्यते पतिना सह गंगायां मरणं तस्य विप्रस्य भार्यया सह ४ स्वर्गवासो हि दंपत्योः
षष्टिवर्षसहस्रकम् ततः पुण्यक्षये जाते मर्त्यलोके वरानने ५ धनधान्यसमायुक्तो धर्मे मतिरयाधिका पुत्राश्च व
हवस्तेषां मरणं चैव जायते ६ कन्यका विविधास्तासां मृत्युश्चैव प्रजायते पुनश्च तस्य हानिश्च बहुरोगः प्रजायते ७ त
स्य शांतिं प्रवक्ष्यामि यत्कृतं पूर्वजन्मनि त्र्यंबके ति च मंत्रेण लक्षजाप्यं च कारयेत् ८ ॥ देवस्य प्रतिमां ९

कर्म॰
१३

कृत्वापूजयेच्चैवशास्त्रतः सुवर्णस्यशिवंकुर्य्यात्पलपंचप्रमाणकम् ९ धूपंदीपेश्चनैवेद्यैर्मंत्रेणानेनपूजयेत्॥ ॐ ह्रौं
ह्रीं जूंसः हरायनमः इतिप्रतिमास्थापनंरौप्यपात्रे॥ ॐ ह्रौंह्रींजूंसः महेश्वरायनमः॥ इतिधूपकर्णानीसंगृह्यस्थापयेत्॥
ॐ ह्रौंह्रींजूंसः पिनाकधृतेनमः॥ इतिप्रतिमांस्पृश्यावाहनंच आवाहयेमहादेवंदेवदेवमसनातनम् इमांपूजां
गृहाणत्वंममपापंव्यपोहतु १० ॐ ह्रौंह्रींजूंसः परंलंवंशंषंसंहंक्षंसोहंसोहंशंकरस्यसर्वेन्द्रियवाङ्मनस्चक्षुः श्रोत्र
घ्राणइहागत्यइहजीवस्थितिंसुखंचिरंतिष्ठतुस्वाहा॥ इतिप्राणप्रतिष्ठांविधायशिवंध्यायन्पूजयेत्॥ ॐ ह्रौं
ह्रींजूंसः पशुपतेनमः इतिपञ्चामृतेनस्नानम् ॐ ह्रौंह्रींजूंसः शिवायनमः इतिचन्दनादिभिः पूजनम् ॐ ह्रौं
ह्रींजूंसः महादेवायनमः इतिविसर्जनम्॥ गोदानंचततः कुर्य्यात्कृष्णांचकपिलांततः प्रियायवेदविदुषेसुवर्णं
दक्षिणांततः प्रदक्षिणांततः कुर्य्याद्धिप्रस्येशानरूपिणः शतसंख्याद्विजांश्चैवभोजयित्वाविसर्जयेत् प्रयागे
मकरेमाघेपत्न्यासहवरानने स्नानंकुर्य्याच्चभोदेविव्रतमेकादशींचरेत् १३ एवंकृतेनसंदेहोरोगनाशश्चजा
यते पुत्रंचापिलभेद्देविचिरंजीविनमुत्तमम् १४ यद्येवंनप्रकुरुतेसप्तजन्मस्वपुत्रकः॥ इतिकर्मविपाकसं
हितायांपार्वतीहरसंवादेरोहिणीनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामसप्तदशोध्यायः १७ शिवउवाच

१३

गोमत्या उत्तरे कूले क्रोशद्वयप्रमाणतः विष्णुदासेति विख्यातो देवीपुत्रो वरानने १ शंकरे वैपुरे शुभ्रे तस्य भार्या
च सुंदरि कर्मशा कुलटा सा वै पतिविद्वेषकारिणी २ शुश्रूषां कुरुते नैव श्वश्र्वाश्वेव वरानने स्वधर्मनिरते नित्यं शि
वभक्तिपरायणः ३ कृषिं वै सो करोच्चैव विभागं चैव सेवकः पित्रोः श्वशुरयोर्दासः सदा च प्रियभाषणः ४ एतस्मि
न्नगरे देवि व्रतीक श्च समागतः भिक्षार्थमागतो द्वारे तया द्वारे तया भिक्षा ददे न च ५ अथ भ्रामवो चतुर्भिक्षुकं प्र
ति सुंदरि विष्णुदासो गृहे नासीत् न हि नैकत्र चिक्षतः ६ एवं बहुगते काले तस्य मृत्युर्बभूव ह भक्तत्वात् मम भो देवि य
स्य लोके गतः सर्वो ७ त्रिंशद्वर्षसहस्राणि यक्षेण सह भागवान् तस्य भार्या मृता क्रूरा श्वश्रूश्वशुरदुःखदायिनी ८ साग
ता नरके घोरे रौरवे नाम्नि भामिनी भुक्त्वा नरकजं दुःखं पुनर्व्याघ्री बभूव ह ९ पुनः शृंगाली वै जाता मानुषी च ततो भवे
त् पुनर्विवाहिता सा वै मर्त्यलोके वरानने १० वंध्या चैव विशला सि पूर्वजन्मविपाकतः रोगो बहु भवेद्देवि सुखं नैव तो
प जायते ११ तस्याः पुण्य प्रवक्ष्यामि पूर्वपापप्रणाशनम् स्वपतिं प्रत्यहं माघे स्नात्वा पादुद्दवारिणा १२ स्वभर्तु चरणौ योमा
तः नमस्कुर्यात् प्रयत्नतः अलाबूनैव रवांदेतु षट्दशाव्द प्रमाणतः १३ माघे नियमतो देवि पतिना सह सुव्रते स्नानं निय
मतो देवि दीपं दद्याद्यथाविधि १४ ततः कृत्वा सुवर्णस्य वृक्षं वै द्विपलस्य च रौप्यं दशपत्रं देवि वेदिं शुभ्रां च कारयेत् १५

वृक्षं न्यस्यां च संस्थाप्य कल्पवृक्षस्वरूपिणं। पूजयित्वा ततो देवं शंखचक्रगदाधरम् १६ सगणं ईशदेवेशं वृक्षस्के तु बुधः
रप्रदम् ततो वै पूजयेद्देवि विधिवच्चारुरूपिणं वस्त्रकांचनकेयूरैः कुंडलाभ्यां विशेषतः १८ तद्वृक्षं वेदिकायुक्तं तस्मै वि
प्राय दापयेत् १८ अन्यान्विप्रान्वरारोहे भोजयेद्विविधै रसैः मोदकैः शुभ्रैः षट्षष्टिप्रतिमान्प्रिये १९ ततो गां कपिलां दद्या
त्स्वर्णशृंगीं सनूपुरान् सप्तमीरविसुक्तायां व्रतं कुर्य्यान्मम प्रिये २० गोपालस्य च मंत्रेण लक्षजाप्यं च कारयेत् हवनं त
द्दशांशेन मार्जनं तर्प्पणं तथा २१ एवं कृते न संदेहो शीघ्रं पुत्रम्अवाप्यते कन्यका नैव जायंते रोगाश्चैव निवर्त्तते २२ इ
ति श्री कर्मविपाकसंहितायां पार्वतीहरसंवादे रोहिणीनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नामाष्टादशोऽध्यायः
१८ शिव उवाच रोहिण्याश्चरणं देवि चतुर्थं सांप्रतं शृणु यत्कृतं संचितं पूर्वमिह जन्मनि तत्फलम् १ बुद्धिशर्म्मा
द्विजः कश्चिद्दन्तवेद्यां बभूव ह पुरोहितो महाभ्रष्टः परपाके सदा रतः २ सा स्त्री परस्ताः तस्य चंचला चपला सदा ध
नं च संचितं तेन प्रतिग्रहेन वै प्रिये ३ मरणं तस्य वै जातं पश्चाद्भार्य्या मृता तु सा गतौ सौ नरके घोरे पूर्वजन्मविपाकतः
४ युगमेकं वरारोहे भुक्त्वा नरकयातनां वृषयोनिं च संप्राप्तो रासभत्वं ततो भवेत् ५ मानुषत्वं पुनर्जातो मध्यदेशे वरा
नने अपुत्रता भवेद्देवि कन्यका नैव जायते ६ शरीरे रोगमुत्पन्नं सुखं नैव प्रजायते प्रायश्चित्तं ततो देवि प्रवक्ष्यामि व

राननने ७ आकृष्णेतिजपन्मंत्रंलक्षंवैविधिवत्प्रिये होमंतुकारयामासतिलांज्यमधुनासह ८ कुंडेवैवर्त्तुलाकारेदशां
शंतर्प्पणंतथा मार्जनंतुविशेषेणततोब्राह्मणभोजनम् ९ दशवर्णप्रदातव्यागुडधेनुस्तथाप्रिये शय्यांदद्यात्प्रयत्ने
नविधिवद्ब्राह्मणायवै १० भोजयेद्ब्राह्मणान्सुष्ठून्वेदपाठरतान्प्रिये सप्तसप्ततिसंख्यान्वैदीक्षितान्शुद्धमानसान्॥
११ प्रयागेमाघमासेवैस्नातःस्नानंसभार्य्यया एवंकृतेनसंदेहःपुत्रस्तस्यप्रजायते १२ रोगःप्रमुच्यतेतस्यवन्ध्यत्वंचप्र
णश्यति मृतवत्सात्वभेत्पुत्रंकन्यकानैवजायते १३ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरोहिणीनक्षत्रस्य
चतुर्थचरणप्रायश्चित्तकथनंनामैकोनविंशोध्यायः १९ शिवउवाच अथवक्ष्येमहादेविचंद्रनक्षत्रजंफलम् यत्कृ
तंमानुषैःपूर्वंतच्छृणुष्ववरानने १ मध्यदेशेपुरेशुभ्रेवसत्येकोद्विजःखलु ब्रह्मकर्मरतोनित्यंवेदवेदांगपारगः
प्रत्यहंपाठयामासचतुर्वेदान्सविस्तरान् वेदशर्माद्विजःख्याततस्यपत्नीसुशीलका ३ प्रत्यहंपाठयेद्वेदंजी
विकार्थंवरानने लोहकारोभवेन्मित्रंतस्यविप्रस्यसुव्रते ४ स्वर्णंशतपलंदेविस्थापितंलोहकर्म्मणा तस्याविप्र
स्यभवनेमित्रत्वाच्चवरानने ५ लोहकारस्यमरणंततःपूर्ववरानने नदत्तंतस्यवैस्वर्णंलोहकारायभामिनी ६ त
त्स्वर्णंप्रत्यहंदेविबुभोजसहभार्यया एवंवहुगतेकालेमरणंब्राह्मणस्यवै ७ सूर्य्यलोकंभवद्देवियतःसूर्यस्यसेव

कः विंशद्वर्षसहस्राणि सूर्यलोके वसात्प्रिये ८ ततः पुण्यक्षये याते मर्त्यलोके च मानवः पुत्रकन्याविहीनस्तु ध
नधान्यसमन्वितः ९ लोहकारस्य स्वर्णं हि गृहीतं नैव दत्तवान् तेन कर्मविपाकेन लोहकारसुतो भवेत् १० प्रीति
मांश्चैव सर्वेषां पितृमातृप्रियंकरः युवा रूपसमापन्नस्तदा मृत्युर्भवेदनु ११ पुनः पुत्रस्य चाभावः कन्यका नै
व जायते तत्पापस्य विशुद्ध्यर्थं प्रायश्चित्तमतः शृणु १२ गायत्रीलक्षजापेन नवदुर्गापूजनेन च दशवर्णाप्रदाने
न भूमिदानेन पार्वति १३ सर्वं पापक्षयं क्षयं याति पूर्वपापसमुद्भवम् गयाश्राद्धं प्रयत्नेन तं दद्यान्नियतः प्रिये १४॥
प्रागे मकरे मासि स्नानं कुर्यात्प्रयत्नतः ततः पापक्षयं याति पुनः पुत्रश्च जीवति १५ रोगाः सर्वे क्षयं यांति नात्र का
र्या विचारणा इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे मृगशिरोनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम विंशोऽध्यायः २० शिव उवाच कान्यकुब्जशुभे देशे निकटे नन्दने पुरे बोधशर्म्मा द्विजश्चासीत् पुरे तस्मिन्हि निर्ध
नः १ परान्नं भुज्यते नित्यं परप्रेष्यरतः सदा तस्य पत्नी समाख्याता बाधमाना भवेत्पुरा २ जन्मतो मरणं यावत्परान्नं भु
ज्यते न वै नरके पतनं तेन तयो जातं प्रतिग्रहात् ३ बहुवर्षसहस्राणि प्रवासो नरके भवत् नरकान्निःसृतो देविका
कश्चैव प्रजायते ४ पुनर्वै मेषयोनिश्च पूर्वकर्मविपाकतः ततो वै मानुषो जातो मध्यदेशे वरानने ५ रोगवान्मृत्यशी

लक्ष्मपुत्रकन्याविवर्जितः परान्नप्रत्यहंभुक्तंश्राद्धंनैवकृतंपुरा ६ अतोवंशस्यवैछेदःफलंचैवतुपूर्वजम् शांतितस्य
प्रवक्ष्यामिपूर्वपापक्षयोयतः ७ गायत्रीजातवेदाभ्यांहिलक्षंजापयेच्छिवे ततःपापविशुद्धिःस्याद्दशांशहवनंयदा ८
मार्जनंदेविकर्त्तव्यंब्राह्मणाननभोजयेत्ततः शतसंख्यान्हिनानमुद्रानगृहस्थानपिभक्तितः ९ वृषमेकंप्रदद्यात्तुनी
लवर्णंविभूषितम् एवंकृतेननसंदेहोरोगोनाशोभवेद्ध्रुवं १० पुत्रस्तुजायतेदेविवन्ध्यत्वंचप्रणश्यति इतिश्रीकर्मवि।
पाकसंहितायांपार्वतीहरसंवादेमृगशिरोनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामैकविंशोध्यायः २१ शिवउ
वाच नर्मदादक्षिणेतीरेपुरीकामामवैपुरी तस्यांपुर्य्यांविशालाक्षिकुलालोधनवानपि १ कुलालकर्मतोदेविवहु
द्रव्यमुपार्जितम् कर्मचन्द्रइतिख्यातस्तस्यपत्नीचदेवकी २ स्वकर्मनिरतोनित्यंपात्रंकृत्वादिनेदिने एवंसर्वव्ययंजा
तंवृद्धत्वंचततोभवत् ३ वृद्धेजातेमहादेविदरिद्रत्वमजायत सूर्प्यकारस्यवैद्रव्यंव्यवहारेगृहीतवान् शतसंख्यामि
तंस्वर्णंव्ययंसर्वंकृतंशिवे कुलालस्याभवन्मृत्युः पत्नीतस्यमृतापुरा ५ नर्मदायांमहादेवितावुभौमृत्युमापतुः॥
तत्तीर्थस्यफलाद्देविस्वर्गलोकंगतावुभौ ६ वहुवर्षसहस्राणितांभ्यांभुक्तंशुभंफलं ततःपुण्यक्षयेजातेमृत्युलोके
चजायते ७ मानुषेपिशुभंजन्मधनधान्यसमन्वितः पुनर्विवाहितानारीपूर्वजन्मप्रसंगतः ८ ऋणसंवंधतोदेविपु

त्रोयानस्तदाशिवे सूर्य्यकारोमहादेविवैरूप्यंवालतः कृतम् ९ प्रत्यहंवसुपद्मव्यंतत्सर्वंचअर्पंतथा घृतवेश्या
प्रदानेनधनंसर्वंवरानने १० गायत्रीलक्षजाप्येनत्र्यंवकेनतथाप्रिये कर्त्तव्यंकुंडमुग्रंवैत्रिकोणंविधिवत्प्रिये होमंच
कारयेद्देविदशांशंतर्प्पणंततः ततोवैकपिलांदद्याद्धेमशृंगीसहाम्बराम् एवंकृत्वावरारोहे पुनःपुत्रः प्रजायते १४
सूर्य्यकारस्यप्रतिमांपलसप्तदशस्यतु सुवर्णस्यैकभोदेविरचितांवस्त्रछादिताम् १५ सूर्य्यैरौप्यस्यवैकुर्य्यात्पलषष्टि
प्रमाणतः प्रदद्याद्वेदविदुषेब्राह्मणायसुतेजसे १६ तस्योद्देशेनभोदेविऋणवंधात्प्रमुच्यते पुत्रश्चजायतेदेविनात्र
कार्याविचारणा १७ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेमृगशिरोनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथ
नंनामद्वाविंशोध्यायः २२ शिवउवाच अथवक्ष्याम्यहंदेविचतुर्थचरणंतथा मृगशिरोनामनक्षत्रंतस्यपूर्वंचसंचि
तम् १ अवंतीपरतोदेविदक्षिणेक्रोशपंचके पुरतत्रैवविख्यातंकेशवंनामशोभनम् २ वसत्येकोहिदेवेशिब्राह्म
णोवेदपारगः किशोरशर्म्माविख्यातोमृतगेहप्रभुज्यते ३ कष्टेनैवमहादेव्ययंकुर्य्याद्दिनेदिने धनंचवहुधाकृत्वापु
ण्यकार्यंनकारयेत् ४ ततोभ्रातुःकनिष्ठस्यभागंनैवददातिसः त्रिकोटिप्रमितंद्रव्यंस्वगृहेचैवसंचितम् ५ द्रव्यस्यैव
विभागायमरणंब्राह्मणोपरि कृतंभ्रात्राकनिष्ठेनद्रव्यंतस्मैतदत्तवान् ६ एवंवहुतिथेकालेकिशोरःसमृतस्तुवै ततो

वेनरके घोरे युगमेकोनविंशति पुनः कर्मवशाद्देविगर्द्दभत्वंचजायत ७ वृषयोनिंनतोजातो मानुषत्वंभवेत्पुनः मध्यदेशेव
रारोहे पुत्रंनैवप्रजायते कन्यकावहवोगर्भाविनश्यंतिवरानने ९ पूर्वजन्मकृतंकर्म भुज्यतेदेविमानवैः इहलोकेवरारोहे
पुण्यंपापंचपूर्वजम् १० भ्रातुस्तस्यकनिष्ठस्यमरणंपूर्वजन्मनि तद्दुद्देशेनभोदेवितस्माद्रोगंचजायते ११ तस्यपापविशु
द्धिंचशृणुदेविप्रयत्नतः गायत्रीमूलमंत्रेणलक्षजाप्यंचकारयेत् १२ गृहंचित्रंषडंशंचपुण्यकार्यंचकारयेत् गायत्रीजा
तवेदेनत्र्यम्बकेनतथैवच १३ लक्षत्रयंजपंचैवदशवर्णांप्रदापयेत् हवनंविधिवत्कुर्यात्तर्पणंमार्जनंतथा १४ सौव
र्णस्यवरारोहेस्तूपंकुर्यात्प्रयत्नतः पलपंचप्रमाणेनद्विगुणंचंद्रमेवच १५ रौप्यस्यैवप्रकुर्यात्तुयथाशास्त्रंप्रपूज
येत् मंत्रेणानेनभोदेविदद्याद्विप्रायतद्द्रूपं १६ शृणुदेविवरारोहेनृणांवैपूर्वजन्मनि यत्कृतेनमहाघोरेनरकेप
रिपच्यते १७ उज्जयिन्यांपश्चिमेद्वारेवैश्योवसतिभाग्यवान् धनधान्यसमायुक्तः स्वधर्मेनिरतःसदा १८ एव
मर्द्धवयोजातंदरिद्रत्वंततोभवत् व्ययार्थंवैततोदेविविप्रस्वर्णंगृहीतवान् १९ पलविंशत्प्रमाणेनव्ययंजातंव
रानने ततोवैश्यस्यमृत्युर्वैभार्य्ययासहितस्यवै २० स्वर्गेजातंततोदेविनमेदामरणादपि षष्टिवर्षसहस्राणिस्व
र्णस्यैवफलंशुभम् २१ भुक्तंबहुविधंदेविभार्य्ययासहितेनवै ततःपुण्यक्षयेजातेपुनर्मर्त्यौबभूवतुः २२ ॥

धनधान्यसमायुक्तो पुत्रकन्याविवर्जितौ रुग्णौ दुर्वलगात्रौ च पूर्वकर्मफलेन तु २३ ऋणसंवंधनो देवि विप्रः
पुत्रोभवत्तदा ऋणं यावत्प्रमाणं वै गृहीतं पूर्वजन्मनि २४ तावन्मात्रं गृहीत्वा तु ततो वै मरणं भवेत् पुनः पुत्रो न न
स्यैव विंशद्वर्षे गते सति २५ तस्य दानं शृणुष्वादौ पूर्वपापक्षयं यतः गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् २६ सुव
र्णपंचपलेनैव पुष्पं च मकराकृतिम् मद्घाद्देवि विदुषे पूर्वपापक्षयो भवेत् २७ पुनः पुत्रः प्रसूयेत नात्र कार्य्या वि
चारणा इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रौद्रनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम त्रयोविं
शोध्यायः २३ शिव उवाच अवन्तीनगरीनाम्ना ततः क्रोशद्वयोपरि अग्निकोणे महादेवि मंगलं नाम वै पुरं त
स्मिन्ग्रामे वसत्येको ब्राह्मणो द्यूततत्परः २ मद्यपानरतो नित्यं चौरविद्यासु तत्परः परस्त्रीलंपटो देवि वेश्यायां
निरतः सदा ३ अत्यहंकुरुते देवि द्विजस्त्र्योनराधमः चौरत्वाद्द्रव्यमुत्पाद्य नैव दानं समाचरेत् एवं वहुधनं या
तं तस्य मृत्युर्वभूव ह नरके पातयामास यमदतो यमाज्ञया ५ सप्ततिर्वै सहस्राणि रौरवे परिपच्यते महाकष्टं ल
भेद्देवि सूचीमुखादिभिर्द्विभिः ६ पुनः कर्मवशाद्देवि नरकान्निर्गतो यदा विडालकाकयोनिं च तदा प्रासो द्वयं हि च
७ योनिद्वयफलं भुक्त्वा मानुषत्वं ततो लभेत् मध्यदेशे वरारोहे न ततो पीडा महत्यपि वंशच्छेदो भवेद्देवि पूर्वकर्म

विपाकतः तस्योपरिविशालाक्षिशांतिंशृणुवरानने ९ गायत्रीजातवेदाभ्यांत्र्यम्बकेनयथाविधि जपंवैकार
यामासहवनंतर्पणंतथा १० लक्षत्रयंजपेद्देविपूर्वपापविशुद्धये ततोवैपूजयेद्देवितुलसींशुद्धरूपिणीं ११ पूजये
द्विविधैश्चान्नैर्धूपनैवेद्यदीपकैः भूमिदानंततोदेवियथाशक्तिप्रदापयेत् १२ एवंकृतेमहादेविसर्वरोगक्षयोभवे
त् पुत्रश्चजायतेदेविवंध्यत्वंचप्रणश्यति १३ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरौद्रनक्षत्रस्यतृतीय
चरणेप्रायश्चित्तकथनंनामचतुर्विंशोध्यायः २४ श्रीशिवउवाच अथातःसंप्रवक्ष्यामिशृणुदेवियथापुरा कृतंनरे
णायत्कृतंपूर्वजन्मनिकिल्बिषं १ अवन्तीपुरतोवात्सीत्शूद्रएकोमहाधनः विक्रयंक्रियतेछागमेढयोगृहवासि
नोः गजमश्वंतथारत्नंवस्त्राणिविविधानिच एकदासूर्यग्रहणंदृष्टंतेनवरानने २ गोसहस्रंकृतदानंभार्ययासहि
तेनवै नर्मदायांविशालाक्षिस्वर्णवस्त्रयुतंतथा ४ तत्रैवबहुधापीडामृत्युलोकसमुद्भवाम् स्वर्णकारस्यवैद्रव्यंव्यवहा
रनिमित्तकं ५ गृहीतंचैवनोदत्तंततः शृणुवरानने ततोबहुगतेकालेशूद्रस्यमरणंह्यभूत् ६ ततोसौनरकेघोरेवर्षं
लक्षद्वयंतथा तत्रैवबहुधापीडांभुक्त्वाचैवस्वकर्मतः ७ पुनर्जातोमर्त्यलोकेकाकंचमहिषंवकः ८ मानुषत्वंततो
देवि कुलेमहतिवैशुभे ८ स्वर्णकारस्यद्रव्यंवैगृहीतंपूर्वजन्मनि नदत्तंवैऋणंदेविपुत्रस्यमरणंततः ९ युवरूपोय

राजानोव्याधिग्रस्ततनुस्तदा देहाद्दैवातरोगः स्वपुत्रस्यमरणंततः १० भार्याद्वयसमायुक्त एकाप्रीतिमतीभवेत् पूर्व
जन्मनियत्कर्मशुभाशुभशरीरतः ११ मर्त्यलोकेमनुष्येणभुज्यतेनात्रसंशयः अथतेसंप्रवक्ष्यामिपापनिग्रहहेतवे १२
गायत्रीलक्षजापेनहरिवंशश्रवणस्यच रथाश्ववस्त्रदानेनग्रामदानेनुवैतथा १३ तिलधेनुप्रदानेनसर्वपापक्षयोभ
वेत् स्वर्णमुद्रासहस्रस्यप्रतिमांकारयेद्बुधः १४ पूर्वोक्तविधानेनपूजयित्वाप्रदापयेत् पार्थिवंपूजयामासतथागोमयन
निर्मितम् १५ लक्षत्रयप्रमाणंचपंचगव्येनपूजयेत् पंचामृतेनवादेविगोदुग्धेनैवपूजयेत १६ तथाचविविधैर्मंत्रैः षड
ङ्गैर्वेदसंभवैः अरोगंमुच्यतेरोगोनात्रकार्यविचारणा १७ वन्ध्यत्वंप्रसवंयानिलभेत्पुत्रंनसंशयः मृतवत्सालभेत्पुत्रं
चिरंजीविनमुत्तमं १८ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरौद्रनक्षत्रस्यचतुर्थचरणेप्रायश्चित्तकथनंना
मपंचविंशोध्यायः २५ श्रीशिवउवाच येनराः परद्रव्यंचहरंतिसततंप्रिये तेनराः दुःखितांयांतिरोगेणैवप्रपीडिताः १
ऋणंयस्यगृहीतंवैतदृणंनददातिच ऋणसंबन्धतोदेविपुत्रोभवतिदारुणः २ तस्यगात्रंचवैभग्नंधातुमन्नंतथानरः
कन्याजातातुपूर्वेहिफलंभवतितादृशम् ३ अवन्तीपुरतोदेविख्यातंचैवसुशोभनं क्रोशमात्रंततोदेविचोत्तरेनगरं
तथा ४ वसंतपुरमित्याख्यंवसंतिबहवोजनाः नाम्नातन्मध्ययाभीरोनंदनोवसतिप्रिये ५ तस्यभार्यातुविख्यातानाम्ना

वैसुंदरीप्रिये सर्वथाचमहादेविरूपणः सहभार्यया ६ मृत्रंतस्यमहादेविब्राह्मणोवेदपारगः सतिष्ठतिपुरीमध्येधनंच
वहुसंचितम् ७ प्रत्यहंचपरान्नेनभोजनंकुरुतेनरः यस्ससपोढियातस्तांपुरीचैवतदात्यजत् ८ आगतोमित्रपार्श्वेवै
वसंतेवैपुरेशुभे आभीरेणगृहेवासंमित्रत्वाद्दत्तवान्स्वयम् ९ वहुकालमवात्सीत्सतत्प्रीत्यासुरसुंदरि आभीरेणततो
देविस्वर्णंदृष्ट्याप्रहर्षि १० तस्यस्वर्णंसमाहृत्यस्वगृहेस्थापितंतदा ब्राह्मणेनमहत्कष्टंकृतंद्रव्यस्यशोकतः ११ महाशोकस
रेशुभ्रेद्विजतिष्ठतिवैशठः स्नेहवेश्यापरस्त्रीणांरतिसंसर्गतत्परः ३ मद्यपानविनादेनिद्रातस्यनजायते तस्यस्त्री
सुमनानाम्नीपतिसेवासुतत्परः ४ प्रत्यहंपूजयेद्देविश्वपतिंपापकारिणम् ततोवहुगतेकालेमरणंव्याघ्रतोभवत्
५ तस्यपत्नीसतीजातासुमाग्नौचदाहिता सत्यलोकेततोदेविकल्पमेकंप्रभुज्यते ६ पत्न्यासहवरारोहेततः पुण्य
क्षयेसती मृत्युलोकेभवजन्मकुलेमहत्तिपूजिते ७ धनधान्यसमायुक्तोवाल्यतोरोगवानपि पुण्यसंवन्धयोगेनपु
ण्यस्त्रीयाचसस्थिता ८ पुनर्विवाहितादेविपुत्रकन्याविवर्जिता अस्यपापस्यशांत्यर्थंपुण्यंशृणुवरानने ९ गृहवित्त
षडंशस्यपुण्यकार्यंचकारयेत् गायत्रीमूलमंत्रेणत्रिलक्षंजपमाचरेत् १० हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥
दशावर्णाततोदानंभूमिदानंविशेषतः ११ गोविंदेतिततोनामजपेन्नित्यंवरानने प्रातःस्नानंसदाकुर्य्यान्माघवैशाख

कार्त्तिके ११ कृष्णस्य सन्ततं देवि भूर्जपत्रेण पुस्तकं समन्ताद्व्याप्य तदग्रे स्थापयेत्स्वगृहं प्रति १३ हरिवंशश्रवणं देवि व्रत
मेकादशीं चरेत् एवं कृत्वा वरारोहे सर्वरोगक्षयो भवेत् १४ पुत्रश्च जायते देवि नात्र कार्या विचारणा इति श्रीकर्मविपा
कसंहितायां पार्वतीहरसंवादे चित्रानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम चतुःपंचाशतमोऽध्यायः ५४ शिव उवा
च अयोध्यापुरतो देवि योजनत्रयदक्षिणे सुधर्मपुरविख्यातं वसन्ति बहवो जनाः १ रतिदासेति विख्यातो विक्रयं कुरुते स
दा दलाढ्यीति समाख्याता तस्य पत्नी च स्वैरिणी २ पतिं न पूजयद्देवि रूपगर्ववशात्तथा महिष्यो बहुशश्च सन्ति गावो विक्रयका
रणात् ३ महिषीपुत्रघाती च मत्यहं खलु जायते छागस्य विक्रयं नित्यं छागानां वधमेव च ४ गोपमेको महासंज्ञो धनार्थी स्वर्ण
संयुतः तत्र जातो महादेवि वैश्यमित्रं हि बाल्यतः ५ तस्य गेहे स्थितो देवि धनधान्यसमन्वितः वैश्यपत्नी तदा देवि गोपं प्र
ति तदा भजत् ६ एवं बहुगते काले तस्य गोपस्य वै मृतिः वैश्यगेहे महादेवि धनं गोपस्य वै खलु ७ वैश्येनैव तु तत्सर्वं धनं त
स्य व्ययं कृतः ततः सर्वे वयो जातं वैश्यमृत्युरभूत्तदा ८ गंगायां च विशालाक्षि पत्नी तस्य तथा मृता वैश्यस्याभूत्तथा स्वर्गो
वर्षषष्टिसहस्रकम् ९ वैश्यपत्नी ततो देवि कर्दमे नरके गता षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनां १० नरकान्निःसृता सा
तु सर्पयोनिं तथा गता सर्पयोनिं ततो भुक्त्वा गंगायां मरणं खलु ११ शूद्रं प्रति सदा स्नेहस्ततः शूद्रा तदाभवत् वैश्यः स्वर्ग

फलंभुक्त्वा मानुषत्वं ततो गमत् १२ धनधान्यसमायुक्तो रूपवानतिथिप्रियः वहुधनी गुणी ज्ञानी पुत्रकन्याविवर्जितः १० स्य भूद्द्विजातिस्त्वं पूर्वस्नेहफलं यतः पत्नी सा च समायाता पूर्वसंवंधकारणात् १३ यतो द्रव्यं समाभुक्तं सर्वं शूद्रस्य वै भवेत् ततश्चैव समुत्पन्नाः कन्या वह्व्यः सुरेश्वरि १५ महिषी पुत्रघातीच वापुरोगादयस्तथा स्वपतेर्वचनं कृत्वा परपुंसि रतायतः १६ तस्मात्पुत्रस्य मरणं गर्भपातः पुनः पुनः अस्य शांतिमहं वक्ष्ये शृणु देवि वरेनघे १७ गृहवित्तस्य खंडशेन पुण्यं कार्यं च यत्नतः वापीकूपतडागादि पथि मध्ये च कारयेत् १८ शिवस्य पूजनं चैव शिवभक्तिमहर्निशम् नमः शिवाय मंत्रं च पंचलक्षं च जापयेत् १९ पार्थिवं लक्षसंख्याकं पूजयेच्च यथाविधि ॐ नमः शिवाय मंत्रस्तु सर्वपापप्रणाशनः २० देहांते मुक्तिदश्चैव मर्त्यलोके च कामदः हवनं कारयेद्देवि कुंडे चैव प्रपूजयेत् २१ चतुरस्रे विशाला तिलधान्यादितंडुलैः ताम्रवर्णा ततो देवि गां दद्याद्धि वृषप्रिये २२ निष्कमात्रं ततः स्वर्णं ब्राह्मणाय प्रदापयेत् एवं कृते न संदेहो व्याधिनाशो भवेद्ध्रुवम् २३ पुत्रश्च जायते देवि पुनर्गर्भो न नश्यति काकवंध्या पुनः पुनः पुत्रं प्रसूयेत न संशयः २४ इति श्री कर्मविपाकसंहितायां पार्वतीहरसंवादे चित्रानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम पंचपंचाशत्तमोऽध्यायः ५५ शिव उवाच देशे पुण्यतमे देवि प्रतिष्ठानपुरे तथा ब्राह्मणो वेदविभ्रष्टस्तत्र वासमकारयेत् सुरामांसस्य वै भुक्त्वा नित्यं मत्स्यं भुनक्ति सः धूर्तेनैव विशालाक्षि व्ययं कुर्याद्दिने दिने २ तस्य स्त्री

परमानाम्नी भ्रष्टा चातीवसुंदरी परपुंसिरता नित्यं निर्भया पतिवंचका ३ एवं सर्वं वयो यातं ततो मृत्युरभूत्किल पुण्यक्षेत्रे च गंगायां देवगंधर्वपूजिते ४ तस्य विप्रस्य वै स्वर्गः कल्पमेकं वरानने भुक्त्वा च विविधं सौख्यं दिव्यकन्याभिरावृतः ५ ततः पुण्यक्षये जाते मृत्युलोके सुरेश्वरि धनाढ्यकुलसंपन्ने तस्य जन्माभवत्तदा पुनः कर्मवशात्तस्य भार्या स्याद्व्यभिचारिणी पुनर्विवाहिता देवि पुत्रोप्यस्य न जायते ७ मद्यपानादिकं पापं पूर्वजन्मनि यत्कृतं तत्फलेन महादेवि व्याधिग्रस्तस्ततो भवत् ८ अथ शांतिं प्रवक्ष्यामि यतः पापक्षयो भवेत् गायत्रीमूलमंत्रेण लक्षजाप्यं वरानने ९ हवनं तद्दशांशेन तर्प्पणं मार्ज्जनं तथा देवस्याराधनं नित्यं सूर्य्यस्य व्रतमाचरेत् १० प्रयागे नियतः स्नानं माघमासि यथाविधि पत्न्या सह विशालाक्षि ततः पापं प्रणश्यति ११ षडंशं च ततो देवि विप्रेभ्यो दानमाचरेत् ततो वर्षेण महतीं गां च दद्यात्पयस्विनीं १२ भूमिं वृत्तिकरीं दद्यात्पुत्रपौत्रानुजीविनम् एवं कृते न संदेहो वंशो भवति नान्यथा १३ रोगार्त्तो मुच्यते रोगात्काकवन्ध्या सुतं लभेत् गर्भभ्रष्टा लभेत्पुत्रं चिरंजीविनमुत्तमम् १४ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे चित्रानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम षट्पंचाशत्तमोध्यायः ५६ शिव उवाच कान्यकुब्जे महादेवि राजा प्यकीवसत्पुरा राजधर्मरतः शांतः प्रजापालनतत्परः १ रुद्रधर्मेति विख्यातो भार्या तस्य प्रभावती एकस्मिन्दिवसे देवि व्याघ्रभयपीडितः २ शरणं श्रावयामास शरणार्थी द्विजोत्तमः तस्य भार्या महादेवि सुरूपाप्य

तिसुंदरी ३ राजपुत्रेणतस्यांतुगमनंमुग्धतः कृतम् शरणंदत्तवान्राजापुत्रस्नेहेनयंत्रितः ४ एवंबहुगतेकालेनृपस्यमरणंयदा
तदायमाज्ञयादूतैः क्षिप्तोनरककर्दमे ५ षष्ठिवर्षसहस्राणिनरकेपरिपच्यते नरकान्ततोविनिः क्रांतः सूकरत्वंततोलभेत् ॥
पुनः सृगालयोनिश्चमानुषत्वंततोगमत् धनधान्यसमायुक्तोबहुज्ञोधनवानपि ७ पुनर्विवाहिताजातापत्नीतस्यप्रभावती ॥
पूर्वकर्मफलाद्देविनस्यपुत्रोनजायते ८ शरीरंसततंदेविज्वरेणैवप्रपीडितम् वातपित्तकफानांचसंभवः स्याद्द्योगते ९ अ
स्यदानंशृणुत्वंहियथापापक्षयस्तथा गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् १० वापीकूपतडागानांजीर्णोद्धारंयदाभवेत् ॥
तदापापक्षयंयातिपूर्वजन्मसमुद्भवं ११ विष्णोरराटमंत्रेणजपंकुर्याद्विचक्षणः दद्यात्गांवेदविदुषेसवत्सांचैवशोभने १२ व
स्त्ररत्नसमायुक्तांघण्टाचामरभूषिताम् ग्रहणेचंद्रसूर्यस्यकाश्यांस्नानंसमाचरेत् १३ निष्कत्रयसुवर्णस्यकमलंकारयेत्त
तः ब्राह्मणायवरारोहेप्रदद्यात्कमलंशुभम् १४ एवंकृतेवरारोहेसर्वपापक्षयोभवेत् अपिवन्ध्यालभेत्पुत्रंचिरंजीविन
मुत्तमम् १५ सर्वेरोगाः क्षयंयातिनात्रकार्याविचारणा इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेस्वातीनक्षत्रस्यप्र
थमचरणप्रायश्चित्तकथनंनामसप्तपंचाशत्तमोध्यायः ५७ शिवउवाच गंगायांदक्षिणेकूलेविंध्येचनगरोत्तमे द्विजो
प्येकोवसद्देविब्रह्मकर्मविवर्जितः १ अनाचाररतोनित्यंपरस्त्रीलंपटः शठः व्यापारंकुरुतेनित्यंगोहिरण्यगजादिकम् २ ॥

वहुद्रव्यंभवेत्तस्यत्रिंशत्कोटिप्रमाणकम् द्रव्यस्यसंग्रहंनित्यंनचाकिंचिद्ददातिसः ३ स्वभार्यांचपरित्यज्यपरभार्यार
तोद्विजः धनेश्वरइतिख्याततस्यनामपुराभवत् ४ ततोवहुगतेकालेतस्यमृत्युरभूत्किल यमकिंकरेणवैवध्वा
निक्षिप्तोनरकार्णवे ५ महाघोरेसुरश्रेष्ठकल्पमेकंतदावसत् पुनर्व्याघ्रस्ययोनिंचवृकयोनिंततोलभेत् ६ पुनर्मा
नुषयोनिंचमृतवत्सात्वमाप्नुयात् महारोगसमायुक्तोनसुखंलभतेक्कचित् ७ अस्यशांतिप्रवक्ष्यामिशृणुदेविवरान
ने गायत्रीमूलमंत्रेणदशलक्षंजपंयदा ८ दशांशहवनंचैवततःपापक्षयोभवेत् गोविंदस्यसदाध्यानंसदागोविंद
कीर्तनम् ९ नित्यंप्रपूजयेद्देवंशंखचक्रगदाधरम् पीताम्बरंधरंश्यामंश्रीवत्सेनविभूषितम् १० अश्वत्थंकार्तिकेमा
सितुलसींविष्णुरूपिणीम् पूजयेद्दीपदानंचदद्याद्दूर्वासमन्वितः ११ गोदानंशास्त्ररीत्याचततोदानंवसुंधराम् य
थाशक्त्याचभोदेविब्राह्मणायशिवात्मने १२ एवंकृतेनसंदेहः पूर्वजन्मकृतंचयत् यत्पापंनाशमायातिसर्वरोगक्षयो
भवेत् १४ वन्ध्यात्वंप्रशमंयातिपुत्रलाभोभवेद्ध्रुवम् काकवन्ध्यालभेत्पुत्रंनात्रकार्याविचारणा १४ इतिश्रीकर्मविपा
कसंहितायांपार्वतीहरसंवादेस्वातीनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामाष्टपंचाशत्तमोध्यायः ५८ शिव
उवाच कुरुक्षेत्रेमहातीर्थेवहवोभोवसतिप्रिये कृषीकर्मरतोनित्यंक्रयविक्रयतत्परः १ गोमहिषीवृषभानांचसं

महंकुरुतेवहु तस्यभार्यावरारोहेपरपुंसिरतःसदा २ स्वपतिंतर्जयन्नित्यंसरानिष्ठुरभाषणाम् संग्रहोवहुद्रव्याणां
नदानंदत्तवान्क्वचित् ३ एकस्मिन्दिवसेदेविचंद्रपर्वणिशोभने दशवर्णांतदादानंकृतंस्वेच्छेनतदाकिल ४ ततोवहुग
तेकालेतस्यमृत्युरभूत्किल यमदूतेनभोदेविनिःक्षिप्तोनरकेकिल ५ त्रिंशद्वर्षसहस्राणिभुक्त्वानरकयातनाम् पु
नमाहिष्ययोनिश्चजातःखलुवरानने ६ नरयोनिंपुनर्लेभेधनधान्यसमन्वितः यातःखलुवरारोहेपुत्रकन्याविव
र्जितः ७ रोगवान्मात्रसंदेहोजंघेपीडाततोधिका अस्यशांतिप्रवक्ष्यामिशृणुत्वंचयथातथा ८ षडंशंचततोदानंविप्रा
यविदुषेतथा गायत्रीलक्षजाप्यंचततोहोमंप्रकल्पयेत् ९ दशांशंतर्पणंकुर्यात्तद्दशांशंचमार्जनम् गांमेकांकपिलांदद्या
त्स्वर्णशृंगीसहाम्बराम् १० ब्राह्मणानपंचपंचाशत्पक्वान्नेनप्रभोजयेत् पंचपात्राणिदद्याद्वैशय्यादानंयथाविधि ११ दश
वर्णाप्रदातव्याब्राह्मणेभ्योयथाविधि एवंकृतेनसंदेहोशीघ्रंपुत्रःप्रजायते १२ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा इति
श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेस्वातीनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामैकोनपंचाशत्तमोध्यायः ४९
शिवउवाच हस्तिनापुरेनगरंख्यातंचैवम नोहरं अवसत्तत्रभोदेविनराःसर्वेविचक्षणाः १ तन्मध्येशूद्रएकोहिधर्मात्माज्ञा
नवानपि स्वधर्मकर्मणाकृत्वाव्ययंकुर्याद्दिनेदिने २ तस्यपुत्रद्वयंजातंद्वौचपापरतौशठौ प्रत्यहंजीवघातीचमद्यवेश्यार

तौ च तौ ३ धूतेनैव महादेवि रणौ वन्हिं च जज्ञतः न च वारयितुं शक्तौ भूद्रेण तौ तदा शिवे ४ ततस्तु दैवयोगेन प्रयागे भूद्रस्त्वागतः
मासमेकं ततः स्थित्वा तस्य मृत्युरभूत्किल ५ विष्णुदासस्ततो लब्ध्वा यज्ञलोकं वरानने विमानं वरमारुह्यो यज्ञे सह वरानने ६
तस्य भार्या विशालाक्षि मर्त्यलोके सुरेश्वरी सा भवेद्विधवा नारी किंचित्काले गते सति ७ परपुंसि रता जारे प्रत्यहं व्यभिचारिणी त
तो वहुगते काले तस्य मृत्युरभूत्किल ८ यमदूतैर्महाघोरैर्निःक्षिप्ता तत्क्षणादपि विंशद्वर्षसहस्राणि नरके परिभुज्यते ९ भू
द्रःपुण्यक्षये जाते मृत्युलोके सुरेश्वरि जन्म तस्या भवद्देवि मध्यदेशे सुरेश्वरी १० तदा ना सा भवेन्नारी या पुरा व्यभिचारिणी पू
र्वजन्मप्रसंगाच्च वंशच्छेदो हि जायते ११ रोगाश्च जायते ताभ्यां कष्टं चैव दिने दिने अस्य पापस्य वै शांतिं तत्समासेन मे शृणु
१२ स्वर्णवृक्षवरं कृत्वा स्वांगुष्ठपरिमाणकम् फलपुष्पसमायुक्तं पलपंचदशस्य तु १३ तस्य वृक्षस्य वै मूले शालिग्रामशिलां
शुभाम् पूजयित्वा विधानेन विष्णुरूपं वरानने १४ ब्राह्मणाय ततो दद्याद्गां च दद्यात्पयस्विनीम् गायत्रीमंत्रजाप्यं तु लक्षमेकं तु
कारयेत् १५ ततः पापविशुद्धिः स्यात्पुत्रो भवति नान्यथा सर्वे रोगाः क्षयं यांति काकवन्ध्या लभेत्सुतम् १६ इति श्रीकर्मविपा
कसंहितायां पार्वतीहरसंवादे स्वातीनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम षष्ठितमोऽध्यायः ६० ॥ शिव उवाच कपिले
नगरे देवि क्षत्रो वसति वै पुरा क्षत्रधर्मविहीनश्च वैश्यकर्मरतः सदा १ प्रत्यहं वैश्यकर्मणा व्ययं कुर्याद्दिने दिने वहुद्रव्यं तदा

नेनसंचितंतिलधर्मणा २ महालोभेनसंयुक्तोधर्मेचर्यानकुत्रचित् पत्नीपुत्रैः कठोरत्वाद्दत्तंतस्यैनदीयते ३ एवंबहुतिथेका
लेमरणंसर्पतस्तदा तिलधर्मेतिविख्यातः पत्नीतस्यचनिष्ठुरा ४ कुंभीपाकेमहाघोरेयमदूतैस्तदाशिवे निःक्षिप्तःशृंखलैर्बं
ध्वातत्तोमहतींयातनाम् ५ युगमेकंवरारोहेकष्टभुक्त्वासुदारुणं ततोभूत्सततोदेविमहिषोवृषभोहयः ६ पुनश्चमानुषोभू
त्वातस्यभार्याचयापुरा विवाहिताचसादेवितस्यांपुत्रोनजायते ७ पुराह्येकाभवत्कन्यापुनःसूतिविवर्जिता रोगोभवतिदेहे
चमध्यमध्येज्वरोभवेत् ८ अस्यशांतिप्रवक्ष्यामिशृणुदेविवरानने कल्पवृक्षवरंकुर्यात्त्वांगुष्ठपारमाणकम् सुवर्णस्यम
हादेविपलपंचदशस्यतु रौप्यस्यतुकृतावेदीपलपंचदशस्यतु १० तत्रवृक्षंसमारोप्यफलपुष्पेणसंयुतम् अष्टम्यांचचतुर्द
श्यांनवम्यांचसुरेश्वरी ११ तस्यवृक्षस्यवैमूलेवृषकेतुंसुरेश्वरी सगणंदेवमीशानमर्चयित्वायथाविधि १२ यथाशक्तिवरारो
हेगंधधूपादिभिस्तथा साष्टांगंदंडवत्तत्रदेवदेवंक्षमापयेत् १३ मंत्रेणानेनभोदेविविसर्जनमथाचरेत् ॐनमःशिवायदेवा
यशिवायसततंनमः १४ ममपूर्वकृतंपापजन्मजन्मसमुद्भवं तत्सर्वंसम्यतांदेवदेव्यासहमहेश्वरम् १५ ततोवैपूजयेद्दिव्यंवे
दब्रह्मस्वरूपिणम् पटवस्त्राद्यलंकारैर्विविधैर्मोदकैरपि १६ ततोवृक्षंसवेदींचकपिलांगांसवत्सकां ब्राह्मणायततोदद्यात्
पूर्वपापविशुद्धये १७ व्रतंममममहादेविशिवरात्रिविशेषतः आजन्ममरणाद्देविव्रतंकुर्यात्प्रयत्नतः १८ एवंकृतेमहादेवि

शीघ्रंपुत्रःप्रजायते रोगाःसर्वेक्षयंयांतिवन्ध्याचलभतेसुतम् १९मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् इतिश्रीक
र्मविपाकसंहितायांपार्वतीहरसंवादेविशाखानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामैकषष्ठिशत्तमोध्यायः ६१
शिवउवाच विष्णुकाञ्च्यांमहादेविब्राह्मणोवेदपारगः अत्याचाररतःशांतोविष्णुभक्तिपरायणः १ स्वान्छिन्नोविष्णु
चक्रेणसविप्रोवैवराननेनवेदःपाठ्यतेतेननविप्रस्पृशतेक्वचित् २ द्विजानांस्मारवृत्तीनांविद्वेषंचकरोतिसः शिव
शक्तिरतानांचनाभिवादनमाचरेत् ३ एवंवयोगतेदेविवृद्धेजातेवराननेमरणंतस्यवैजातंब्राह्मणस्यवराननेननेने ४ यम
दूतैर्महाघोरेनरकेक्षिप्तवांस्तदा रौरवेचतदादेविषष्ठिवर्षसहस्रकम् ६ भुक्त्वानरककष्टंचपुनर्जातःसरीसृपः मानु
षत्वंपुनर्जातंकष्टानिविविधानिच ६ पुत्रस्यमरणंकांतेप्रतिवर्षेभवेत्सुतः पुनःस्त्रीकाकवन्ध्याभूत्पूर्वजन्मप्रसंगतः।
७ धनधान्यसमायुक्तंमानुषत्वंलभेत्क्वचित् अथवक्ष्येमहादेविपूर्वपापस्यनिष्कृतिम् ८ गंगामध्येप्रदातव्यंपूर्वपाप।
विशुद्धये निष्कत्रयंसुवर्णस्यकमलंनिर्मितंशुभम् ९ दद्याद्धेदविदेदेविब्राह्मणायशुभार्थिने अष्टांशंयद्धृहेदेविब्रा
ह्मणायसमर्पयेत् गायत्रीजातवेदाभ्यांदशायुतजपंततः कूष्मांडंनारिकेरंचपंचरत्नसमन्वितः ११ एवंकृतेनभो
द्देविपूर्वपापविशुद्धता पुत्रंचैवलभे द्देविचिरंजीविनमुत्तमम् १२ व्याधयःप्रशमंयांतिज्वराःसर्वेविनश्यति का

कवन्ध्यालभेत्पुत्रं चिरंजीविनमुत्तमम् १३ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेविशाखानक्षत्रस्यद्वितीयचर
णप्रायश्चित्तकथनंनामद्विषष्टितमोऽध्यायः ६२ शिवउवाच विदर्भनगरेदेविक्षत्रीह्येकोवसत्पुरा तेजशर्मेतिविख्या
तोद्विजानांद्रव्यहारकः १ प्रजानांदुःखदोनित्यंवेदानांचैवनिंदकः तस्यत्रासवशात्सर्वाःप्रजाग्रामात्पलायिता २ एवंब
हुगतेकालेतस्यमृत्युरभूत्किल यमदूतैर्महाघोरैर्नीसिमेनरकेततः ३ द्विसप्ततिसहस्राणिघोरेनरककर्दमे भुक्तंनरक
कष्टंचसूचीमुखमथाकृता ४ नरकान्निर्गतोदेविगर्दभत्वंततोभवत् रासभत्वंततोदेविमानुषत्वंततोभवत् ५ तस्यभार्या
भवद्वन्ध्यापूर्वजन्मफलाद्यतः तस्यगात्रेभवद्रोगोदद्रुरर्शोदयस्तथा ६ नसुखंलभतेदेविचिंतयाव्याकुलेंद्रियः शृणुसर्वं
वरारोहेपूर्वपापस्यनिग्रहं ७ दशांशंयद्गृहेदेविब्राह्मणायसमर्प्पयेत् वापीकूपतडागादिपथिमध्येचकारयेत् ८ गृहदानंततो
देविसर्ववस्तुसमन्वितम् प्रदद्याद्देवविदुषेब्राह्मणायवरायच ९ आकृष्णेतिजपंदेविलक्षमेकंचकारयेत् होमंवैकारयामास
तिलाज्यमधुतंदुलैः १० ततोगांकपिलांदेविब्राह्मणायप्रपूजितम् प्रदद्याद्विधिवत्स्वैवसर्वालंकारभूषिताम् ११ सुवर्णनिष्कमा
त्रंतुब्राह्मणायततोददेत् एवंकृतेवरारोहेरोगनाशोभवेद्ध्रुवम् १२ पुत्रश्चजायतेदेविवन्ध्यत्वंचप्रणश्यति काकवन्ध्यालभेत्पु
त्रंनात्रकार्याविचारणा १३ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेविशाखानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनं

नाम त्रिषष्ठितमोध्यायः ६३ शिव उवाच मायापुर्यां महादेवि सत्री ह्येकः स तिष्ठति सच्छूरश्च धनी मानी देवतातिथिपूजकः
तस्य भार्या विशालाक्षि शांतनाम्नी वराङ्गना ब्राह्मणातिथिदेवानां पूजने वापि तत्परा २ एकस्मिन्समये देवि हेमकारस्तदा
गतः स चाढ्यः स्वर्णसंयुक्तो हेमकारस्तदावसत् ३ सत्रियायस्य मित्राय शतं स्वर्णस्य वै पलम् प्रदत्तं हेमकारेण चान्यत्स्व
र्णं समर्पितम् ४ अत्रांतरे महादेवि स्वर्णकारस्ततो मृतः दंष्ट्रः सर्प्पेण तीव्रेण स्वर्णकारमपुत्रिणम् ५ स्वर्णं सर्वं गृहीत्वा तु प्र
भुक्तं क्षत्रियेण तत् पुत्रदारेण संयुक्तो किंचिद्दानेन कल्पितं ६ ततो वहुगते काले तस्य मृत्युरभूत्किल क्षत्रियस्य महादेवि
सुरलोकस्ततो भवत् ७ सौख्यं सुरांगनासार्द्धं षष्ठिवर्षप्रमाणकम् ततः पुण्यक्षये जाते मर्त्यो भवति भामिनि ८ धनधान्य
समायुक्तो भार्या भवति या पुरा न चैव कन्यका पुत्रस्तस्य खलु वरानने ९ गर्भं च जायते देवि तद्गर्भं पतनं भवेत् रोगमुग्रं भवे
द्देवि न सुखं जायते खलु १० शांतिं शृणु वरारोहे यतः पापक्षयो भवेत् षडंशं च ततो देवि ब्राह्मणाय समर्प्पयेत् ११ दशवर्णी
ततो दद्याद्विप्राय श्रोत्रिणे प्रिये गायत्रीमूलमंत्रेण लक्षजाप्यं च कारयेत् १२ पक्वान्नेनैव भो देवि ब्राह्मणान्भोजयेत् शतम् रूप्यं
स्वर्णस्य वै देवि फलपुष्पसमन्वितः १३ दद्याद्विप्राय विदुषे पलं दशप्रमाणकम् सूर्यस्य पूजनं देवि रविवारे विशेषतः १४ एवं
कृते वरारोहे शीघ्रं पुत्रश्च जायते ज्वरस्य वै भवेन्मुक्तिः काकवन्ध्या सुतं लभेत् १५ मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्त

मम् इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेविशाखानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामचतुःषष्ठितमोध्या
यः ६४ शिवउवाच कल्याणपुरनाम्नावैमायापुर्याःसमीपतः तिष्ठतिवणिक्जनोप्येकोधनाढ्योधनगर्वितः १ क्रयंचकुरुते
नित्यंविक्रयंचसदाकरोत् महालोभवशाद्देविनदानंकुरुतेक्वचित् २ तस्यभार्याविशालाक्षिपुंश्चलीकुलटाधमा पुत्रद्वयंवरा॥
रोहेपुंश्चल्यांजज्ञिरेतदा ३ एकोद्यूतरतःपुत्रोद्वितीयोब्राह्मणीरतः वैश्येनैवविशालाक्षिधनंचबहुसंचितं ४ प्रत्यहंभुज्यतेछ
गंविक्रयंकुरुतेसदा वृद्धेसतिमहादेविवैश्यस्यमरणंह्यभूत् ५ यमदूतैस्तदावध्वानिःक्षिप्तोनरकार्णवे स्वरूपंदर्शयामासत
स्मैवैश्यायभोशिवे ६ नवतिवर्षसहस्राणिघोरेनरकदारुणे महाकष्टंतदाप्रापमक्रमिभिर्घोररूपिभिः ७ ततोव्याघ्रस्यसैयो॥
निंकाककुक्कुटयोःपुनः मानुषत्वंपुनर्यातःपुत्रकन्याविवर्जितः ८ पुनर्विवाहितासातुयापत्नीपूर्वजन्मनि रोगवत्यभव
त्सोग्रामृतवत्सापुनःपुनः ९ एकापत्यातदाजातापुनःपुत्रोनजायते यदासर्वस्वदानंवैसूर्यस्याराधनंयदा १० हरिवंशश्रव
णंदेविदुर्गास्तोत्रजपंतथा गायत्रीमूलमंत्रेणलक्षजाप्यंयदाभवेत् तदापुत्रोभवेद्देविव्याधिनाशश्चजायते ११ इतिश्रीक
र्मविपाकसंहितायांपार्वतीहरसंवादेअनुराधानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामपंचषष्ठितमोध्यायः ६५ शिवउ
वाच मगधेवैशुभेदेशेकाष्ठकारोवसत्प्रिये पुत्रपौत्रसमायुक्तोधनाढ्योगुणवानपि १ यदाचाहंवपापातंदरिद्रस्त्वंतदाभव

त् गृहीतंयतिनोद्रव्यंशतपंचपलंतथा २ व्ययंकृत्वायदातेननदत्तंयतिनेशिवे ततस्तस्यभवेन्मृत्युःकाष्ठकारस्यमागधे॥
३ ददौवैकपिलांकृष्णांस्वर्णरौप्यविभूषिताम् पुत्रेणापिकृतंश्राद्धंशास्त्ररीत्यागयादिकं ४ यमलोकेतदायातोवर्षशतस
हस्रकम् पुनःपुण्यक्षयेयातेकपियोनिंततोलभेत् ५ ऋक्षस्यैवपुनर्योनिंमानुषत्वंततोलभेत् धनधान्यसमायुक्तोगुण
ज्ञोप्यतिसुंदरः ६ पूर्वजन्मनिभोदेविकाष्ठच्छेदःकृतःसदा तेनपापेनभोदेविशरीरेमहतीव्यथा ७ यतिनेद्रव्यगृहीतंचन
दत्तंयतिनेयतः तेनजातःसुतोदेविऋणसंबंधकारणात् ८ द्यूतवेश्यारतःनित्यंपितृर्मात्रोविरोधकृत् युवरूपोयदा
यातस्तदामृत्युश्चजायते ९ पुनःपुत्रस्यसंदेहःकाकवन्ध्यात्वमाप्नुयात् पत्नीतस्यवरारोहेमृतवत्सापुनःपुनः १०॥
अस्यशांतिमहंवक्ष्येशृणुदेविप्रयत्नतः गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् ११ सूर्यमंत्रस्यवैजाप्यंवैदिकस्यव
रानने आकृष्णेतिमहामंत्रःसर्वव्याधिविनाशनः १२ सर्वकामप्रदोदेविमोक्षदोमुक्तिकारणम् सूर्यदेवस्ययो
भक्तिंकुरुतेनियतोनरः १३ नाकिंचिद्दुर्लभंतस्यपुत्रश्चैवधनंबहु ममातीवप्रियोनित्यंसूर्यदेवउपासिने १४ मद्भ
णात्ताहिरक्षंतियतश्चमत्कलारविः कमलंसुज्वलंदेविकांस्यपात्रसुशोभनं १५ तस्योपरिसुवर्णस्यसूर्यंरत्नविभू
षितम् पलंपंचमितंदेविमंत्रेणानेनपूजयेत् १६ ॐनमःसूर्यायदेवायभद्रायभद्ररूपिणे पूर्वजन्मकृतंसर्वंममपापं

व्यपोहतु १७ प्रतिमां पत्रसंयुक्तां ब्राह्मणाय च दापयेत् ततो गां कपिलां दद्यात्सवस्त्रां स्वर्णभूषिताम् १८ ब्राह्मणाय ततो दद्यात्परवस्त्रेणच्छादितां रविसप्तमीव्रतं कुर्यात्पत्न्या सह वरानने १९ पूर्वजन्मकृतं पापं नश्यत्येवं कृते प्रिये रोगाः सर्वे क्षयं यान्ति पुत्रलाभो भवेद्ध्रुवं २० काकवन्ध्या लभेत्पुत्रं मृतवत्सा च पुत्रिणी इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे अनुराधानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम षट्षष्टितमोध्यायः ६६ शिव उवाच सुकर्मे पुरविख्यातं सौराष्ट्रे देशशोभने तत्र तिष्ठति वैश्यो विप्रो ब्रह्मकर्मविवर्जितः १ विक्रयं कुरुते नित्यं गजवाजिरथादिकं राजमृत्युं समासाद्य ग्रामदाहस्तथा कृतः २ ब्राह्मणा बहवस्तत्र ब्राह्मण्याश्च तथा शिवे मृता ग्रामस्य वै दाहे बह्व्यो गावो मृताः खलु ३ ततो बहुतिथे काले मृतः सोपि द्विजाधमः ततस्तु यमदूतेन नरके घोरकर्दमे ४ यमाज्ञया च निःक्षिप्तः कष्टं भुक्तं मुहुर्मुहुः नरकान्निर्गतो देवि गजयोनिं ततो लभेत् ५ कच्छपत्वं ततो याति काकयोनिं ततो भवत् मानुषत्वं ततो याति कुले महति शोभने ६ सर्वसंपत्तिसंयुक्तो वंशस्तस्य न जायते बहुकन्यासमायुक्तो रोगयुक्तो भवेन्नरः ७ भार्या तस्य ज्वरग्रस्ता मासे वर्षे भवेज्ज्वरः अतः शांतिं प्रवक्ष्यामि यतः खलु सुखी भवेत् ८ चतुर्भागं गृहद्रव्यं ब्राह्मणाय समर्पयेत् प्रयागे मकरे मासि पत्न्या सह वरानने ९ स्नानं तु नियतः कुर्यात्तस्माहं च ततः शिवे हेमदानं ततः कुर्याद्भूमिदानं

चपार्वति १० गायत्रीजातवेदाभ्यांत्र्यम्बकेनतदाजपत् दशायुतप्रमाणेनहवनंमार्जनंतथा ११ ब्राह्मणान्भोजयेद्दुग्धापक्का
न्नैः पायसेनच विप्रेभ्योदक्षिणांदद्याद्धस्त्ररत्नविभूषिताम् १२ दशवर्णांततोदद्याद्धरिवंशश्रवणंततः एवंकृतेवरारोहेशी
घ्रंपुत्रमवाप्नुयात् १३ काकवन्ध्यालभेत्पुत्रंपुनर्देविनसंशयः रोगाःसर्वेक्षयंयांतिमृतवत्सालभेत्सुतम् १४ इतिश्रीकर्म
विपाकसंहितायांपार्वतीहरसंवादेऽनुराधानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामसप्तषष्ठितमोध्यायः ६७॥ शि
वउवाच नन्दीजनोवसत्येकःसौराष्ट्रविषयेशुभे सकविर्भोगपवान्देविस्वधर्मेनिरतःसदा १ तस्यस्त्रीसुंदरीदेविपतिसेवा
सुतत्परः एकस्मिन्दिवसेदेविब्रह्मचारीसमागतः २ आतिथ्यकरणेतस्यचासमर्थस्तदाशिवे उपोषणंकृतंतेनहारेव
न्दिजनस्यच ३ प्रभातेसवरारोहेशापंदत्वागतस्तुवै ततस्तुदैवयोगेनमार्जारीतत्रसूतिका ४ पंचपुत्रावरारोहेघाता॥
स्तेनभामिनी मार्जारीचतदादेविक्षुधार्ताचतदातथा ५ ततोवहुतिथेकालेतस्यमृत्युरभूत्पुरा पत्नीपतिव्रतातस्यसती
जाताचतत्क्षणे ६ सत्यलोकेवरारोहेयुगमेकमुवाससः पत्न्यासहवरारोहेसौख्यंहिमानसेप्सितं ७ भुक्तंदेवाङ्गनासार्द्धं
पुनःपुण्यक्षयेसति मानुषत्वंततोलेभेपत्न्यासहवरानने ८ धनधान्यसमायुक्तोवराभार्याविवाहिता पुत्राश्चवहवोजा॥
तास्तेषांमृत्युरभूत्किल ९ साज्वरेणसमाविग्नामध्येतापयुतापुनः तस्यपापस्यवैशांतिंशृणुत्वंगिरिजेवरे १० जातवेदस्य

मंत्रेणलक्षजाप्यंचकारयेत् विडालप्रतिमांकृत्वापंचवालेनसंयुताम् ११स्वर्णरौप्यस्यवादेविपलपंचदशस्यतु सवस्त्रां
वैतदादद्याद्ब्राह्मणायवराननने १२ गामेकांरक्तवर्णांचतांविप्रायप्रदापयेत् अमायांपिंडदानंचसोमवारेतथागुरौ १३ व्रतंचर
विसमम्याक्रियतेभार्ययासह ततःपुत्रोभवेद्देविचिरंजीवितयोत्तमः १४ व्याधिनाशोभवेद्देविवन्ध्यत्वंचप्रणश्यति इतिकर्म
विपाकसंहितायांपार्वतीहरसंवादेअनुराधानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामाष्टषष्टितमोध्यायः ६८ शिवउ
वाच ब्राह्मणोवसतिह्येकोमहाराष्ट्रपुरेशुभे सवेदपाठनिरतोवेदपाठंसदाकरोत् १ तडागंखादयामासतत्रद्रव्यंचलब्धवान
द्रव्यस्यार्थेनदादेविविप्रहोभ्रातरंप्रति २ भ्रातातस्यमहादेविद्रव्यार्थंभक्षितंविषं बहुकालेतदादेविव्ययंसर्वंधनंकृतम् ४ त
तश्चपंचतांयातोब्राह्मणश्चसुरेश्वरि यमदूतैर्महाघोरैर्नरकेदेविकर्दमे ४ षष्टिवर्षसहस्राणिनिःक्षिप्तश्चयमाज्ञया भुक्त्वा
नरकजंदुःखंकाकयोनिरभूत्पुनः पुनर्मानुषयोनिश्चपुत्रकन्याविवर्जितः पूर्वजन्मनिभोदेविभ्रात्रेशंनैवदत्तवान् ६ तेन
पापेनभोदेविमहारोगसमुद्भवः अस्यशांतिंप्रवक्ष्यामिशृणुत्वंगिरिजेवरे ७ गृहवित्ताष्टमंभागंपुण्यकार्यंचकारयेत् वापीकूप
तडागादिजीर्णोद्धारंप्रयत्नतः ८ प्रतिमांकारयेद्देविस्वर्णपंचदशस्यतु भ्रातुश्चित्तंतदादेविपूजयित्वायथाविधि ९ गंधधू
पादिभिर्देविभूषणैर्विविधैरपि गायत्रीलक्षजापेनदशांशहवनेनतु १० प्रयागेमकरेस्नानंसर्वपापक्षयोभवेत् ब्राह्मणाय

ततोदद्याद्गां चदद्यात्पयस्विनीम् ११ भूमिवृत्तिकरींदद्यात्पुत्रपौत्रानुपायिनीम् अश्वदानंततोदद्याद्ब्राह्मणान्भोजयेत्ततः १२
एवंकृतेवरारोहेपुत्रोभवतिनान्यथा व्याधिस्तस्यनिवर्त्ततेकाकवन्ध्याभवेत्सुतम् १३ मृतवत्सालभेत्पुत्रंचिरंजीविनमु
त्तमं इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेज्येष्ठानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामैकोनसप्ततितमोऽ
ध्यायः ६९॥ शिवउवाच पटनेवैपुरेसुभ्रेलोहकारोवसत्पुरा गोवर्द्धननामाचतत्पत्नीसचपरेश्वरी १ धनधान्यसमायु
क्तोधर्मकर्मरतस्तथा तस्यपुत्रद्वयंजातंलोहकारस्यपार्वति २ ज्येष्ठपुत्रस्तुभोदेविभार्ययासहतेनवै निःसारितोगृहाद्देवि
तस्मैकिंचिन्नदीयते ३ एकोगृहेततःपुत्रोद्रव्यंतस्यप्रयच्छति लोहकारेणभोदेविस्वभार्यापुत्रसंयुता ४ त्यक्ताचैवमहादे
विगोपालस्यतुकन्यका भार्याकृतापुनस्तेनपत्न्यात्यागंचवैकृतम् ५ ततोवहुगतेकालेलोहकारस्यवैशिवे व्याघ्रेणमर
णंजातंयमदूतैर्यमाज्ञया ६ निःक्षिप्तोनरकेघोरेकृमिविष्टादिसंकुले त्रिंशद्वर्षसहस्राणिभुक्त्वानरकयातनाम् ७ नरका
न्निर्गतोदेविमानुषत्वंततोलभत् पुनःसर्पस्ययोनिंचततोनकुलमेवच ८ मानुषत्वंततोदेविधनधान्यसमाकुलं शूद्रवंश
तविज्ञश्चज्ञानवान्राजवल्लभः ९ पुरैवयत्कृतंसर्वंतत्प्राप्नोतिनसंशयः पुरैवकार्त्तिकेमासिपौर्णमास्यांसदाशिवे १० दश
वर्णाकृतंदानंविधिवन्ममवल्लभे तेनदानफलेनेहधनाढ्यत्वंप्रजायते ११ स्वभार्यांचपरित्यज्यपरस्त्रीपारतःसवै अतःपु

कर्म
५५

त्रस्यवैमृत्युः पुनः पुत्रोनजायते १२ कन्यकाजनयित्रीचतस्यभार्याभवत्खलु भार्यापुत्रकृतंत्यागः परस्त्रीपारतो पतः १३॥
तत्पापेनमहादेविरोगग्रस्तकलेवरः व्याधयश्चसमुत्पन्नाः दद्रुयामादयस्तथा १४ ख्यातवंशेसमुत्पन्नोभूमिभागोनलभ्यते।
अथशांतिंप्रवक्ष्यामिपूर्वपापविमुक्तये १५ एकादशीव्रतंनित्यंषडंशदानमाचरेत् षडंशपाठयामासरुद्रपूजनपूर्वक
म् १६ हरिवंशश्रवणंदेविचंडीपाठनिरंतरं तिलधेनुप्रदानंवैब्राह्मणाच्चविशेषतः १६ एवंकृतेतत्सदेविपुत्रस्तस्यभ
विष्यति वन्ध्यात्वंप्रशमंयातिसर्वरोगक्षयोभवेत् १८ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेज्येष्ठानक्षत्रस्यद्विती
यचरणप्रायश्चित्तकथननामसप्ततितमोऽध्यायः ७० शिवउवाच वीजापुरइतिख्यातोपुरेदेविमनोहरे वसन्तिबहवोव
र्णाः पतिनश्चवणिग्जनाः १ तन्मध्येशूद्रएकोहितांबूलंचकरोतिसः सुरापीचसवैनित्यंतांबूलविक्रयीशिवे २ तस्यपुत्र
द्वयंजातंधनंचबहुसंचितम् ततस्तुदैवयोगेनमहाधनमदेनच ३ ज्येष्ठपुत्रस्यहवनंकृतंतेनवराननने स्वभार्य्या
र्थंतदानीतापत्नीतस्यतुतेनही ४ पुत्राभ्यांचभवेद्वैरंपत्न्यासहविशेषतः प्रत्यहंभुज्यतेतेनपुत्रपत्नीतथाधमः
५ एवंबहुदिनेजातेतस्यमृत्युरभूच्छिवे ततोवैनरकेघोरेगमदूतैर्यमाज्ञया ६ निःक्षिप्तोवैततोजेविषष्ठिवर्षसह
स्रकम् कृमिभिर्घोररवक्रैश्चभुक्त्वानरकयातनाम् ७ नरवत्तन्निर्गतोदेविस्वानयोनिंततोलभत् ततोरषभयोनिंच

५५

मानुषत्वं न नो गतः ८ पूर्वजन्मनि भो देवि दशवर्णा दसौ वहु तत्फलेनेह भो देवि धनधान्यसुतस्तदा ९ पुत्रस्य प
त्नी भक्त्या तु पुत्रस्यैव वधः कृतः तत्पापफलतो देवि ह्यपुत्रश्च ज्वरी तथा १० व्याधिश्च वहुधा तस्य चाङ्गे च महती
व्यथा तदा चिन्तासमायुक्तो रात्रौ निद्रां न लभ्यते ११ स्ववित्तस्य त्रयं भागं प्रगृह्य हरवल्लभे कूपं च खादयामास त
डागं जीर्णमुद्धरेत् १२ पौर्णमासीव्रतं देवि सकलं त्वं तदाकरोत् शिवस्य पूजनं लक्षं ब्राह्मणेभ्यश्च कारयेत् १३ कृष्णं
च गां च वृषभं ब्राह्मणाय प्रदापयेत् गायत्रीमूलमंत्रेण तथा लक्षप्रमाणतः १४ जपं वै कारयामास हवनं तद्दशांशतः मा
र्जनं तर्पणं देवि दशांशं चैव कारयेत् १५ पुत्रस्य प्रतिमां तद्वत्स्वर्णेन वस्त्रसमन्विताम् पलपंचदशस्यैव निर्मितां रत्नभूषि
तां १६ पूजां कृत्वा विधानेन ब्राह्मणाय प्रदापयेत् एवं कृते न संदेहः शीघ्रं पुत्रमवाप्नुयात् १७ व्याधिश्च प्रशमं याति काकव
न्ध्या लभेत्सुतम् मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् १८ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे ज्येष्ठान
क्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नामैकसप्ततितमोऽध्यायः ७१ शिव उवाच चतुर्भुजपुरं नाम वेणीयाम्रि मतः
शिवे पट्टकारो वसद्देवि लक्ष्मणेति च संज्ञकः १ तस्य पत्नी विशालाक्षि परपुंसि रता सदा पुत्राश्च वहवो जाता धनं च
वहु संचितम् २ क्रयविक्रयधर्मेण व्ययं कृत्वा दिने दिने तस्य गेहे करोद्दासं चटका नाम पक्षिणी ३ एकस्मिन्समये देवि

चाण्डन्दत्वापि पक्षिणी वहून्वै पोषिता चाण्डान्स पश्चान्कृतवांस्तदा ४ फलगृध्नुस्तदा पक्षी मध्यान्हे वालकान्प्रति ॥ भोजनं प्रददौ नित्यं स्वकुलाय तदाशि ५ ततस्तु दैवयोगेन पट्टकारस्तु तद्गृहे भोजनार्थं ततो देवि पत्नी चान्नं तदा ददे ॥ ६ भुक्तं च विविधं चान्नं ततस्तेण पक्षिवालकाः विष्टां च कुस्तथा दृष्ट्वा पट्टकारो रुषा खलु ७ कुलं तस्य कृतं नष्टं वालानां हननं तथा एवं वहुगते काले पट्टकारस्य सुव्रते ८ गंगायां मरणं जातं भार्यया सहितस्य वै स्वर्गवासो भवेद्देवि पट्टकारस्य सुव्रते ९ सप्ततिवर्षसहस्राणि स्वर्गं भुक्त्वा फलं वहु पुनः पुण्यक्षये जाते स्वर्गभ्रष्टो यदाभवत् १० मनुष्यश्चाभवद्देवि गंगागंडकमध्ययोः धनधान्यसमायुक्तो विवाहमकरोद्यदा ११ पूर्वजन्मास्थिता भार्या सा तस्य गृहमेधिनी ॥ प्रेष्ययुक्ता भवत्तानु गर्भस्य पतनं मुहुः १२ कन्यका नैव जायंते पुत्रस्यैव तु का कथा ज्वरयुक्ता सदा नारी स्वशरीरे भव तव खलु १३ सुखं न लभते क्वापि दुःखपाति दिने दिने अस्य शांतिं प्रवक्ष्यामि शृणु सर्ववरानने १४ ग्रहस्याच्चंद्रसूर्यस्य गायत्रीजपमाचरेत लक्षमेकं वरारोहे पूर्वपापविशुद्धये २५ गृहाविनाष्टमभागं पुण्यकार्ये च कारयेत् कपिलां गां सवत्सां च ब्राह्मणाय प्रदापयेत् १६ दशवर्णां ततो दद्याद्ब्राह्मणान्भोजयेत्ततः चटकस्याकृतिं कृत्वा सार्भकस्य नराननने १७ रौप्यस्य स्वर्णताम्रस्य पंचविंशत्पलस्य तु ब्राह्मणाय ततो दद्याद्भूमिदानं विशेषतः १८ हरिवंशश्रवणं कुर्याद्भार्यया सहितस्य वै हवनं

तर्पणं कुर्यान्मार्जनं तु ततः परं १९ जातवेदस्य मंत्रेण दशायुतजपं तथा गोपालमंत्रजाप्येन पुत्रलाभो भवेद्ध्रुवं २० रोग
नाशो भवेद्देविका कवन्ध्यालभेत्सुतम् इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे ज्येष्ठानक्षत्रस्य चतुर्थचरणप्रायश्चित्तक
थनं नाम त्रिसप्ततितमोध्यायः ७३ शिव उवाच अयोध्यानगरे देवि कायस्थो वसति प्रिये रामदास इति ख्यातस्तस्य पत्नी तु देविका
विष्णुभक्तिरतो नित्यं ब्राह्मणस्य च सेवकः भार्या पतिव्रता तस्य पतिसेवासु तत्परा २ भाग्यवान्सर्ववस्तूनां विक्रेता गजवाजिनां तस्य मि
त्रो भवद्विप्रो ब्राह्मणो वेदपारगः ३ आगतो वै गृहे तस्य प्रेम्णा मित्रस्य भामिनी चातुर्मास्यं स्थितस्तत्र स्वर्णं शतपलं तदा ४ कायस्थस
गृहे स्वर्णं स्थापितं ब्राह्मणेन वै वाराणस्यां गतो देवि स्नानार्थं [illegible] द्विजोत्तमः ५ शरीरं त्यक्तवांस्तत्र ब्रह्मचारी द्विजस्तदा ततो बहुतिथे
काले कायस्थस्य दरिद्रता ६ तद्धनं ब्राह्मणस्यैव भुक्तं तेन वरानने पुनर्वै मरणं देवि कायस्थो भार्यया सह ७ अयोध्यायां ततो देवि त्ता
योः स्वर्गो ह्यजायत ॥ नवतिं वर्षसहस्राणि ब्रह्मलोके वरानने ८ भुक्त्वा सौख्यमनेकं तु देवानामपि दुर्लभं ततः पुण्यक्षये जाते मर्त्यलो
के सुरेश्वरि ९ तत्पापेनाभवद्देवि कन्यापुत्रप्ररोधनं अस्य पापस्य वै शांतिं शृणु मे परमेश्वरि १० प्रायश्चित्तं सुरश्रेष्ठे पूर्वजन्मसमु
द्भवम् गृहवित्तषडंशेन ततो दानं प्रकल्पयेत् ११ गायत्री त्र्यम्बकाभ्यां च जातवेदेन चानघे जपं वै कारयामास प्रतिमंत्रं दशायुतम् ॥
ततो होमं दशांशेन तर्पणं मार्जनं तथा पलं दशसुवर्णेन ब्राह्मणस्य तदाकृतिम् १२ पूजयित्वा यथान्यायं ब्राह्मणाय ततो ददेत् ततो गां

कपिलां दद्यात्स्वर्णवस्त्रविभूषिताम् १४ प्रतिवर्षं ततो देवि दशवर्णान्ददेत्पुनः एवं कृते न संदेहो वंशमस्य भवेत्खलु १६ रोगं शरीरजं
न्यं चैव तस्य नाशः प्रजायते काकवंध्यालभेत्पुत्रं मृतवत्सा ततः प्रिये १७ चिरंजीविसुतं चैव नात्र कार्या विचारणात् ॥ इति श्रीकर्मवि
पाकसंहितायां पार्वतीहरसंवादे मूलनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नाम चतुःसप्ततितमोध्यायः ७४ शिव उवाच पश्चि
मस्यामयोध्याया योजनानां त्रयोपरि राघवस्य पुरे देवि वसंति बहवो जनाः १ तन्मध्ये ब्राह्मणो ह्येको योगशर्मा ततः प्रिये तस्य पत्नी
समाख्याता गुणज्ञा परमा शुभा २ तत्र वासो भवद्देवि ज्ञानवानतिपंडितः पुरोहितो महादेवि धनाढ्यः कृपणस्तथा ३ प्रतिग्रहेण
भो देवि व्ययं कुर्याद्दिने दिने तस्य भ्राता कनिष्ठश्च व्यापारकरणे ततः ४ उभौ द्वौ ब्राह्मणौ देवि शांतिमंतौ परस्परं ततो बहुगते
गते वैरं जातं तदा शिवे ५ स्वधनस्य विभागार्थं युद्धं जातं सुदारुणम् तदुद्देशेन भो देवि मृतो भ्राता कनिष्ठकः ६ तद्धनं गृ
ह्य वै स्वर्णं सर्वं पुत्राय दत्तवान् दानं नैव कृतं तेन ततो वै मरणं खलु ७ यमदूतैर्महाघोरैर्निःक्षिप्तो रक्तकर्दमे बहून्यब्द
सहस्राणि भुक्त्वा नरकयातनां ८ नरकान्निर्गतो देवि गर्दभत्वं प्रजायते वृकयोनिं ततो भुक्त्वा मानुषत्वं ततो भवत् ९ ॥
वैद्यविद्यारतो देवि कन्यावान्सुतवर्जितः रोगयुक्तो महादेवि सदा भिक्षारतो नरः १० पूर्वपापविशुद्ध्यर्थं प्रायश्चित्तं शृणुष्व मे
हरिवंशश्रवणं देवि शिवपूजनमेव च ११ अमायां पिण्डदानं च गोदानं च विशेषतः षडक्षरं तथा मन्त्रं शुद्धं मम सुरेश्वरि

१२ जयंवैकारयामासदशलक्षंवराननेहोमंवैकारयामासकुंडेचित्रेवरानने १३ चतुरस्रेवरारोहेतिलधान्यादितंडु
लैः प्रतिमांकारयामासभ्रातुःस्वर्णस्यवैशिवे १४ पलंदशप्रमाणेनमंत्रेणानेनपूजयेत् ॐनमःसवित्रेदेवायवेद
वेदांगपारगः १५ पूर्वजन्मकृतंसर्वंममपापव्यपोहतु अज्ञानाद्वाप्रमादाद्वाभ्रातुरशणपहारतः १६ तदर्थंगौर्यया
दत्तासाध्वीभूतायतेनमः प्रतिमांपूजयित्वातुब्राह्मणायदद्देततः १७ एवंकृतेविधानेनशीघ्रंपुत्रमवाप्नुयात् काक
वन्ध्यावरंपुत्रंजनयामासभामिनी १८ व्याधयोनाशमायांतितूलराशिर्यथानलः॥ इतिश्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेमूलनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामपंचसप्ततितमोध्यायः ७५ शिवउवाच शरयाश्चो
त्तरेकूलेमंगलंनामवैपुरं तत्रस्त्रीवसत्येकामद्यमांसंचभुज्यते १ भावसेनश्चनाम्नासत्तस्यपत्नीमनोहरा वेश्या
द्यूतरतश्चासौलुब्धश्चौरेषुसम्मतः २ प्रत्यहंचौरकर्मेणव्ययंकुर्याद्दिनेदिने ततोवहुगतेकालेतस्यमृत्युरभूत्किल
३ सर्पेणापिमहादेवियमदूतैर्यमाज्ञया रौरवेनरकेक्षिप्तःषष्ठिवर्षसहस्रकम् ४ नरकान्निर्गतोदेविव्याघ्रयोनिंततो॥
लभेत् मानुषत्वंततोलेभेकुलेमहतिपूजिते ५ पूर्वजन्मनिभोदेविदीपदानंकृतंयतः तत्फलेनमहादेविधनाढ्यत्वं
प्रजायते ६ मद्यपानफलाद्देविवेलाज्वरसमुद्भवः वेलासुरतसंयुक्तोपतोपिपूर्वजन्मनि ७ तेनपापेनभोदेविपुत्राणां

मरणंखलु मनसुद्वेगतानित्यंजातोद्भुतरतःपुरा ८ अस्यशांतिप्रवक्ष्यामिसर्वपापविशुद्धये गृहवित्तषडंशेन पुण्यकार्यंच
कारये ९ वापीकूपतडागंश्चपथिमध्ये चकारयेत् गायत्रीमूलमंत्रेणलक्षजाप्यंचकारयेत् १० दशांशहवनंतद्वत्तर्पणं।
मार्जनंतथा दशावर्णातत्तोदद्याद्वृषभेनसमन्वितम् ११ एवंपापविशुद्धिःस्यान्नात्रकार्याविचारणा सुतश्चजायतेदेवि
वन्ध्यत्वंचप्रणश्यति १२ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् रोगाविनाशमायांतिव्याधयश्चतथाशिवे १३ इतिश्रीकर्म
विपाकसंहितायांपार्वतीहरसंवादेमूलनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामषष्ठसप्ततितमोध्यायः ७६ शिवउवा
च मध्यदेशेविशालाक्षिहिडंबनामवैपुरं लवणकारोवसत्येकोभीमोगुणविचक्षणः १ नित्यहंलवणंकृत्वाविक्रयंकुरुतेस
दा तस्यपुण्यवतीभार्यापुत्रत्रयमजीजनत् २ धनधान्यवृषछागंगोमहिष्यादिकंतथा वहूनिसंचितानिस्युर्लवणकारस्यवै
गृहे ३ तस्यज्येष्ठःसुतोदेविवेश्यासुरतनतत्परः एकस्मिन्समयेदेविलवणकूपेनिशामुखे ४ भार्ययासहदेवेशिवृषभोपतितोत
दा श्रुत्वातेनतदादेविनिशायांनगतोपिसः ५ त्रयाणांविभवेन्मृत्युःस्वकालेज्ञातिनासह॥ भार्यानिःसारितातेनवृषभोमृतस्सं
युतो ६ ततःसर्ववयोजातंवृद्धेसतिवरानने मरणंतस्यवैजातंलवणकारस्यपार्वति ७ यमदूतैर्महाघोरैर्नरकेघोरसंज्ञके पा
तयामासदेवेशिद्वाविंशतिसहस्रकम् ८ वर्षसुभुज्यतेदेविकृमिश्रूचीमुखैर्युतं नरकान्निःसृतोदेविव्याघ्रयोनिमजायते ९ पु

नच्छागस्यवैयोनिंबिडालस्यततोभवत् मानुषत्वंततोलेभेदेशेपुण्यतमेशुभे १० स्वकर्मवशगोनित्यंधनधान्यसमन्वितं गु
णज्ञःसर्वविद्यानांकन्यापुत्रमजायते ११ लवणाकारस्यमरणंगंगायापूर्वजन्मतः तत्फलेनमहादेविधनाढ्यत्वंप्रजायते १२॥
स्वभार्यापतितादेविलवणाकारनिशामुखे नैवनिःसारितादेवितनःकन्याप्रजायते १३ वृषभोपतितौकूपेयातितौमृत्युमागतौ
तेनदोषेणदेवेशिपुत्रोनैवप्रजायते १४ परस्त्रीरतिसंयोगोयत्कृतंपूर्वजन्मनि तेनपापेनभोदेविशरीरेरोगसंभवः १५ अस्य
शांतिंप्रवक्ष्यामिशृणुदेविसुशोभने गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् १६ गायत्रीलक्षजाप्यंचविप्रद्वाराच्चकारयेत् हव
नंतद्दशांशेनमार्जनंतर्पणंतथा १७ सुवर्णस्यकृतामूर्तिर्लक्ष्म्याःपंचपलस्यतु रौप्यस्यैववरारोहेवृषभौद्वौसुनिर्मलौ १८ पलं
दशकस्यवैकुर्यात्पूजयित्वायथाविधि मंत्रेणानेनदेविशिचोपचारैःपृथक्पृथक् १९ ॐलक्ष्मीदेविमहालक्ष्मीकमलेसर्वसि
द्धिदे ममपूर्वकृतंपापंतत्समस्तंदयानिधे २० ॐलक्ष्म्यैनमः पाद्यंसम· ॐलक्ष्म्यै अर्घ्यंस· ॐदेव्यैनमः स्नानं· ॐकमलायै·
गंधः ॐसर्वायै· धूपं· ॐसिद्धिदायै· दीपं· पाद्यादिसर्वाणिदापयेत् ॐनंदिकेश्वरभूतेशगणानामधिपोभवत् ममपूर्वकृतंपा
पंक्षम्यतांपरमेश्वर २१ इतिमंत्रेणवृषभौपूजितौशुभ्ररूपिणौ पूजयित्वायथान्यायंब्राह्मणायदद्देततः २२ ततोगांकपिलांदद्या
त्स्वर्णशृंगीसुभूषितां एवंकृतेवरारोहेयत्कृतंपूर्वजन्मनि २३ तत्सर्वंनाशमायातिशीघ्रमेवनसंशय पुत्रोपिजायतेदेविवंध्य

त्वंच प्रणश्यति २४ रोगाः सर्वे क्षयं यांति नात्र कार्या विचारणा मृतवत्सालभेत्पुत्रं चिरंजीविनमुत्तमम् २५ काकवन्ध्या लभेत
पुत्रं पुनर्दैविन संशयः ॥ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे मूलनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम सप्त
सप्ततितमोध्यायः ७७ शिव उवाच तत्रायोध्यां महादेवि वशिष्ठश्चैव चाश्रमे श्रीधनेश्वरशर्मेति ब्राह्मणो वसति प्रिये १ स पंडि
तो गुणज्ञश्च धनीमानी विचक्षणः स्त्री च पतिव्रता तस्य पतिसेवासु तत्परा २ पुत्रद्वयं तथा जातं विद्यासक्ति जीवति भागि
नेयस्ततो देवि तद्धनेश्वरशर्मणः ३ तत्र वासार्थमायातः सह पत्न्या वरानने तीर्थयात्राप्रसंगेन गृहे तस्यावसद्द्विजः ४ मासमेकं
स्थितं तत्र भागिनेयस्ततो मृतः दष्टः सर्पेण देवेशि कर्मकांडं तथाकृतं ५ वर्षमात्रेण ते जाते भागिनेयस्यैव वधूः धनेश्वरे महाप्री
तिर्जाता खलु वरानने ६ भार्यापुत्रं च वै रुध्य प्रत्यहं जायते तदा गृहे स्वर्णं चरौप्यं च सर्वं तस्यन्यवेदयेत् ७ ततो बहुगते काले तस्य मृ
त्युरभूत्किल यमदूतैर्महाघोरे नरके क्षिप्तवान् शिवे ८ यमाज्ञया वसरो हे षष्ठि वर्षसहस्रकम् अन्यत्रापि कृतं पापं प्रयागे च वि
नश्यति ९ प्रयागे यत्कृतं पापं रामपुर्यां विनश्यति अयोध्यायां कृतं पापं वज्रलेपो भविष्यति १० नरकान्निःसृतो देवि वकयोनि
र्जायत पुनर्दर्दुरयोनिं वै काकयोनिस्ततो भवत् ११ पुनर्मानुषयोनिं च धनधान्यसमन्वितः जातः पुण्यतमे देशे देवगंधर्वसेवि
ते १२ सर्वविद्यासु विख्यातो गुणज्ञो रूपवांस्तदा पूर्वजन्मनि देवेशि भागिनेयवधूं प्रति १० संभोगकृतवान् विप्रः कुक्षिपीडानतः

परं वंशछेदं विशालाक्षि कन्यकावहवस्तथा २४ भागिनेयस्य वै द्रव्यं भुक्तं पुत्रयुतं यतः शरीरे वहुधा पीडा परस्त्रीगमनादनु २५॥
अस्य शांतिं प्रवक्ष्यामि शृणु त्वं मम वल्लभे गृहवित्त षडंशं च पुण्यकार्यं चकार स २६ गायत्रीजातवेदाभ्यां जपं वै कारयेत्ततः दशां
शं हवनं कृत्वा तर्पणं मार्जनं तथा २७ जीर्णोद्धारं वरारोहे कूपं चैव तडागकं तद्वदेव च वै कुर्यात्षष्टिवृक्षावरोपणं २८ प्रयागे माघमा
से तु तुलादानं प्रयत्नतः धूम्रवर्णां तथा गां वै दद्याद्विप्राय सत्कृतां २९ एवं कृते वरारोहे पूर्वपापं विशुध्यति पुत्रोपि जायते देवि वं
ध्यात्वं च प्रणश्यति २० काकवंध्यात्वशांत्यां वै रविमुक्तां तु सप्तमिं कृत्वा पत्नी वरारोहे सुवर्णदानमाचरेत् शय्यादानं ततो दद्या
न्मृतवत्सा सुपुत्रिणी सर्वे रोगाः क्षयं यांति नात्र कार्या विचारणा २२ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे पूर्वाषाढनक्ष
त्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाष्टसप्ततितमोध्यायः ७८ शिव उवाच कर्णाटे वै ततो देवि पुरं च शिवसंज्ञकं वसंति त
म वहतो वैश्याः पुण्योपजीविनः १ तन्मध्ये भूद्रएको हि धरणीकरविश्रुतः तस्य रूपवती भार्या सुंदरी वहुसं २ व्यापारेण महादे
वि धनं वहु च संचितं ततो वहु दिने जाते तस्य मित्रो द्विजोप्यभूत् ३ ब्राह्मणो सोपि वै भ्रष्टः कष्टं भुक्तादिने दिने स्वर्णं शतपलं देवि ही
रकं मौक्तिकं तथा ४ स्थापितं ब्राह्मणाद्द्रव्यं स्वगृहे मित्रकारणात् ततो वृद्धे तु वै जाते वैश्यमृत्युरभूत्पुरा ५ पश्चात्पत्नी मृता तात
स पत्नी गर्ववर्जिता वैश्यस्यैवाभवत्स्वर्गे दिव्यवर्षसहस्रकम् ६ पत्न्या सह वरारोहे भुक्त्वा स्वर्गफलं ततः वकयोनिं ततो लेभे

चक्रवाकस्ततोभवत् ७ हंसयोनिस्ततोजातोमानुषत्वंततोभवत् पूर्वसंवंधतः पुण्यः पूर्वंपतिव्रताऽपि ८ पुनर्विवाहितादेवि
ब्राह्मणायप्रदापयेत् वंध्याजातासुतानारीदुःखिताचाप्यहर्निशं ९ तस्मदेहे भवद्व्याधिः कफवातसमन्वितः धनाढ्योवहुधा
कन्याजायतेचपुनःपुनः १० अस्यनिग्रहहेत्वर्थंशृणुसर्ववरानने यद्गृहेवित्तमंद्देहिब्राह्मणायसमर्पयेत् ११ ॐलक्ष्मी
नमोथमंत्रेणदशायुतजपंततः दशांशहवनंतद्वत्तर्पणंमार्जनंतथा १२ गांमेकांकृष्णवर्णांवैस्वर्णशृंगीसवत्सकां ब्रा
ह्मणायततोदद्यान्मुक्तालांगूलग्रंथितां १३ भोजनंकारयामासब्राह्मणान्वेदपारगान् शतंवाद्विशतंदेवित्रिशतंवा
विशेषतः १४ पलंशतसुवर्णस्यवेदींकृत्वाविचक्षणः तन्मध्येचद्विजस्यैवरौप्यस्यैवचयत्नतः १५ पूजयामासदे
वेशिमंत्रेणैवपुनःपुनः ब्रह्मस्त्वंकपिलोविष्णुःसर्वसाक्षीजगन्मयः १६ ममापराधेदेवेशसम्प्राप्तांपूर्वजन्मनि द्रव्यां
मित्रस्यभोदेविस्थापितंस्वगृहेमया १७ नरत्तंवैमयाज्ञानात्सम्प्राप्तांपरमेश्वर मंत्रेणानेनदेवेशिपूजनंविधिपूर्वकं
१८ पूजयित्वाततोदेविब्राह्मणायप्रदापयेत् एवंकृत्वावरारोहेशीघ्रंपुत्रःप्रजायते १९ काकवन्ध्यापुनर्देविकन्यका
मजनीतथा पुत्रंप्रसूयतेदेविनचकन्याप्रसूयते २० मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् व्याधयःसंक्षयंयाति
नात्रकार्याविचारणा २१ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेपूर्वाषाढनक्षत्रस्यद्वितीयचरणप्रायश्चि

त्तेनामैकोनत्रशीतितमो ७९ शिवउवाच अंतर्वेदे विशालासिलोधोवसतिपुण्यकृत् गंधर्वपुरविख्यातेनगरेयमुना
तटे १ सभाग्यवान्गुणज्ञोहिवहुभृत्यैःसुपूजितः भूपतिस्तस्यदेशस्यदाताभोक्ताविचक्षणः २ ब्राह्मणस्यहृताभूमिरज्ञा
नाद्वासुरेश्वरि ब्राह्मणोपिविषंभुक्त्वामृतस्तस्योपरिप्रिये ३ ततोवहुगतेकालेतस्यमृत्युरभूत्पुरा यमदूतैर्महाघोरेकुंभी
पाकेचक्षिप्तवान् ४ यमाज्ञयावरारोहेयुगमेकंपयाचवै ॥ महादुःखेनसंतप्तोवहुकष्टप्रलब्धवान् ५ नरकान्निःसृतो
देविसूकरत्वंप्रजायते ऋक्षयोनिंततोभूत्वामुकयोनिंततोभवेत् ६ पुनर्मानुषयोनिंवैमध्यदेशेवरानने धनधान्यसमा
युक्तोवंशहीनोवरानने ७ पूर्वजन्मनिदेवेशिहृताभूमिवरानने ब्राह्मणोवैमृतःपूर्वंतद्दुदेशेनवैशिवे ८ अतःपुत्रविही
नोयंकन्यकावहुजायते महारोगेनसंतप्तोमृतवत्सापुनःपुनः ९ अस्यशांतिमहंवक्ष्येपूर्वपापस्यशांतये गायत्रीजात
वेदाभ्यांत्र्यंवकेनवरानने १० दशायुतंजपःकार्यःप्रतिमंत्रैःसुरेश्वरि दशांशंहवनंतद्वत्तर्पणंमार्जनंतथा ११ दश व
र्णततोदानंशतंब्राह्मणभोजनं भूमिदानंततःकुर्यात्शतविप्रहमानकं १२ पलपंचसुवर्णस्यब्राह्मणस्यतथाकृतिं
पूजयित्वायथान्यायंब्राह्मणायप्रदापयेत् १३ प्रयागेमकरेमासिपत्न्यासहवरानने स्नानंकरोतिदेवेशिपूर्वपापंव्यपो
हति १४ एवंकृत्वावरारोहेपुत्रोजातःसवैशिवे वंध्यत्वंनाशमायातिकाकवंध्याचगुर्विणी १५ मृतवत्सालभेत्पुत्रंचि

कर्म॰ रंजीविनमुत्तमम रोगाः सर्वे क्षयं यांति नात्र कार्या विचारणा १६ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे पू
५९ र्वाषाढनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम अशीतीतमोध्यायः ८० शिव उवाच अयोध्यायां विशालाक्षि
मालाकारो वसन्पुरा साधुवृत्तिरतः श्रीमान्ब्राह्मणानां च सेवकः १ तस्य पत्नी महादुष्टा कुलटा व्यभिचारिणी मात्स्य
कृत्वा विशालाक्षि जीवयामास बांधवान् २ तस्य मित्रो द्विजो प्येकः स्वर्णलक्षद्वयं तथा स्थापितं स्वगृहे देवि गतं च बहु व
सरं ३ याचितं तेन स्वं द्रव्यमर्धं प्राप्तं तदा शिवे तदर्धं च व्ययं जातं मालाकारस्य वै गृहे ४ एवं बहुगते काले मालाकारो मृतः
पुरा अयोध्यायां विशालाक्षि स्वर्गस्याच भवत्किल ५ लक्षवरारोहे भुक्तं स्वर्गे फलं शुभं ततः पुण्यक्षये जाते मानुषत्वं भ
वेत्पुनः ६ मध्यदेशे च देवेशि पुत्रकन्याविवर्जितः तस्य पत्नी पुनर्देवि या स्थिता पूर्वजन्मनि ७ विवाहिता च सा देवि व्या
धियुक्ता ज्वरा अस्य शांतिं वरारोहे शृणु मे परमेश्वरि ८ षडंगं पाठयामास शिवपूजनतत्पर षडक्षरेण मंत्रेण लक्षजाप्यं व
रानने ९ हवनं तद्दशांशेन मार्जनं तर्पनं तथा श्रवणं मासमेकं तु चंडिकाचरितत्रयं १० ततः षडंशं देवेशि ब्राह्मणाय स
मर्पयेत् ततो गां कपिलां दद्यात्तिलधेनुं सुपूजितां ११ अश्वदानं विशालाक्षि महिषीं दुग्धसंयुतां सुवर्णस्य कृतं वृक्षं फ
लपुष्पसमन्वितं १२ पलं दशस्य वै देवि ततः पुत्रः प्रजायते मृतवत्सा च या नारी काकवंध्या च रोगिणी १३ सर्वासां वांछि ५९

तंकार्यंजायतेनात्रसंशयः १४ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेपूर्वाषाढनक्षत्रस्यचतुर्थचरणप्रायश्चित्तक
थनंनामैकअसीतीतमोध्यायः ८१ श्रीशिवउवाच श्वेतपर्वैमहातीर्थेरामपुर्यांवरानने कान्यकुब्जोवसद्विप्रोव्यापारकरणेर
तः १ अश्वादिकंवरारोहेवृषचर्माजिनांवरं प्रत्यहंगृह्यतेदेविविक्रयंक्रियतेसदा २ द्यूतवेश्यारतोनित्यंपरस्त्रीगमनंतथा
प्रकरोतिसुरापानंगुरुदेवंनमन्यते ३ एवंवहुगतेकालेमरणंतस्यजायते यमदूतैर्महाघोरेवध्वाक्षिप्तःसुदारुणे ४ षष्ठिवर्ष
सहस्राणिभुक्त्वानरकयातनां नरकान्निःसृतोदेविवानरस्यामवेद्भुवः ५ ततोरासभयोनिंवैतुरंगस्तुततोभवत् मानुषत्वपुन
र्लेभेपूर्वजन्मफलाद्यतः ६ धनधान्यसमायुक्तोरोगयुक्तोप्यपुत्रकः कदाचिद्दैवयोगेनपुत्रोभवतिभामिनी ७ मरणंतस्यवैश
घ्रंततःकन्याप्रजायते अस्यशांतिंशृणुष्वादौयथापापनिवर्तते ८ गृहवित्तषडंशंचपुण्यकार्येचकारसः पूर्वजन्मनिदेवेशि
कनीयांसंस्वभ्रातरं ९ रात्रौखड्गेनवैहत्वातत्पापाच्चसुतक्षयः गायत्रीमूलमंत्रेणपंचलक्षंवरानने १० जपंवैकारयामास
नित्यंगोविंदकीर्तनं होमंवैकारयामासकुंडेषट्कोणसंज्ञके ११ पायसेनविशालाक्षितिलसर्पियुतेनच दशांशंततोद
द्याद्ब्राह्मणपशिवात्मने १२ भूमिदानंततोदद्याच्छय्यादानंविशेषतः भ्रातुश्चैवाकृतिंकृत्वारौप्येणैववरानने १३ पलसप्त
प्रमाणेनप्रजांकृत्वाप्रसन्नधीः देवदेवमहादेवचर्मभस्मविभूषण १४ पूर्वजन्मनिदेवेशभ्रातुर्वधःकृतोमया तत्पापंक्षम्य

तांदेवप्रपद्येशरणंजव २५ प्रतिमांपूजितांदेविमंत्रेणानेनवैशिवे· दद्याद्विप्रविदुषेशांतिपापद्विजंनमः २६ ततोवैभाजयामा
सब्राह्मणान्वेदपारगान् एकाधिकशतंदेविपायसेमोदकेनच १७ एवंकृत्वावरारोहे पूर्वपापस्यसंक्षयः वंध्यत्वंप्रशमंयाति
पुत्रःखलुप्रजायते १८ काकवंध्यालभेत्पुत्रंमृतवत्सासुपुत्रिणी व्याधयःसंक्षयंयातिनात्रकार्याविचारणात् १९ इतिश्री॥
कर्मविपाकसंहितायांपार्वतीहरसंवादेउत्तराषाढनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनाम द्व्यशीतितमोध्यायः॥८२
शिवउवाच सकेश्वरपुरेदेविवसत्येकोद्विजोवरः म्लेच्छवाणीवदन्नित्यंम्लेच्छसेवारतःसदा १ सतिष्ठतिम्लेच्छनिकटे
म्लेच्छविद्यासुपंडितः मत्स्यमांसंचमद्यंचभोजनंचाकरोत्तदा २ एवंसर्ववयोजातंधनंवहुसुसंचितं तद्धनंभूमिमध्येतु॥
स्थापितंतुगृहेशुभे ३ एकस्मिन्समयेदेविभ्रातःपुत्रःसमागतः रत्नव्यापारकरणेसदक्षश्चतुरस्तथा ४ तस्यगेहेस्थितंननि
त्यंरत्नंवहुसुसंचितं रत्नलोभेनभोदेविरात्रौछुरिकयातदा ५ पतितस्यवरारोहेसुप्तेनिशिममातरं तन्संर्वभूमिमध्येतुस्था
